4.1.11 मनः

4.1.12 अनो बहुव्रीहेः

4.1.13 डाबुभाभ्यामन्यतरस्याम्

4.1.14 अनुपसर्जनात् 77

4.1.15 टिड्-ढाणञ्-द्वयसज्-दघ्नञ्-मात्रच्-तयप्-ठक्-ठञ्-कञ्-क्वरपः

(वा०) नञ्-स्नञीकक्-ख्युंस्तरुण-तलुनाना-मुपसङ्ख्यानम्

4.1.16 यञश्च यञः 18

4.1.17 प्राचां ष्फ तद्धितः ष्फ 19

4.1.18 सर्वत्र लोहितादि-कतन्तेभ्यः

4.1.19 कौरव्य-माण्डूकाभ्यां च

4.1.20 वयसि प्रथमे

4.1.21 द्विगोः 24

4.1.22 अपरिमाण-बिस्ताचित-कम्बल्येभ्यो न तद्धितलुकि न तद्धितलुकि 24

4.1.23 काण्डान्तात् क्षेत्रे

4.1.24 पुरुषात् प्रमाणेऽन्यतरस्याम्

4.1.25 बहुव्रीहेरूधसो ङीष् बहुव्रीहेः 29; ऊधसः 26

4.1.26 सङ्ख्याव्ययादेर्ङीप् सङ्ख्यादेः 27; ङीप् 39

4.1.27 दाम-हायनान्ताच्च

4.1.28 अन उपधालोपिनोऽन्यतरस्याम् अनः, उपधालोपिनः 29

4.1.29 नित्यं संज्ञा-छन्दसोः संज्ञाछन्दसोः 31

4.1.30 केवल-मामक-भागधेय-पापापर-समानार्य-कृत-सुमङ्गल-भेषजाच्च

4.1.31 रात्रेश्चाजसौ

4.1.32 अन्तर्वत्-पतिवतोर्नुक्

4.1.33 पत्युर्नो यज्ञसंयोगे पत्युः, नः 35

4.1.34 विभाषा सपूर्वस्य

4.1.35 नित्यं सपत्न्यादिषु

4.1.36 पूतक्रतोरै च ऐ 38

4.1.37 वृषाकप्यग्नि-कुसित-कुसीदानामुदात्तः उदात्तः 38

4.1.38 मनोरौ वा वा 39

4.1.39 वर्णादनुदात्तात् तोपधात् तो नः वर्णाद् अनुदात्तात् 40

4.1.40 अन्यतो ङीष् ङीष् 65

4.1.41 षिद्-गौरादिभ्यश्च

(वा०) पिप्पल्यादयश्च

4.1.42 जानपद-कुण्ड-गोण-स्थल-भाज-नाग-काल-नील-कुश-कामुक-कबराद् वृत्त्यमत्रावपनाकृत्रिमा-श्राणा-स्थौल्य-वर्णानाच्छादनायोविकार-मैथुनेच्छा-केशवेशेषु

4.1.43 शोणात् प्राचाम्

4.1.44 वोतो गुणवचनात् वा 45

4.1.45 बह्वादिभ्यश्च बह्वादिभ्यः 46

(वा०) कृदिकारादक्तिनः

(वा०) सर्वतोऽक्तिन्नर्थादित्येके

4.1.46 नित्यं छन्दसि छन्दसि 47

4.1.47 भुवश्च

4.1.48 पुंयोगादाख्यायाम् पुंयोगात् 49

(वा०) पालकान्तान्न

(वा०) सूर्याद्देवतायां चाप् वाव्यः

(वा०) सूर्यागस्त्ययोश्छे च ङ्यां च

4.1.49 इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिमारण्य-यव-यवन-मातुलाचार्या-णामानुक्

(वा०) हिमारण्ययोर्महत्त्वे

(वा०) यवाद्दोषे

(वा०) यवनाल्लिप्याम्

(वा०) मातुलोपाध्याययोरानुग्वा

(वा०) अर्यक्षत्रियाभ्यां वा स्वार्थे

4.1.50 क्रीतात् करणपूर्वात् करणपूर्वात् 51

4.1.51 क्तादल्पाख्यायाम् क्तात् 53

4.1.52 बहुव्रीहेश्चान्तोदात्तात् बहुव्रीहेः, अन्तोदात्तात् 53

4.1.53 अस्वाङ्गपूर्वपदाद् वा वा 55

4.1.54 स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्

(वा०) अङ्गगात्रकण्ठेभ्य इति वक्तव्यम्

4.1.55 नासिकोदरौष्ठ-जङ्घा-दन्त-कर्णश्रृङ्गाच्च

4.1.56 न क्रोडादि-बह्वचः न 58

4.1.57 सह-नञ्-विद्यमानपूर्वाच्च

4.1.58 नख-मुखात् संज्ञायाम्

4.1.59 दीर्घजिह्वी च च्छन्दसि

4.1.60 दिक्पूर्वपदान् ङीप्

4.1.61 वाहः

4.1.62 सख्यशिश्वीति भाषायाम्

4.1.63 जातेरस्त्रीविषयादयोपधात् जातेः 64

(वा०) योपधप्रतिषेधे हयगवयमुकयमनुष्य-मत्स्यानामप्रतिषेधः

(वा०) मत्स्यस्य ङ्याम्

4.1.64 पाक-कर्ण-पर्ण-पुष्प-फल-मूल-बालोत्तरपदाच्च

4.1.65 इतो मनुष्यजातेः मनुष्यजातेः 66

4.1.66 ऊङ् उतः ऊङ् 72

4.1.67 बाह्वन्तात् संज्ञायाम्

4.1.68 पङ्गोश्च

(वा०) श्वशुरस्योकाराकारलोपश्च

4.1.69 ऊरूत्तरपदाद् औपम्ये ऊ..त् 70

4.1.70 संहित-शफ-लक्षण-वामादेश्च

4.1.71 कद्रु-कमण्डल्वोश्छन्दसि क..ल्वोः 72

4.1.72 संज्ञायाम्

4.1.73 शार्ङ्गरवाद्यञो ङीन्

(वा०) नृ-नरयोर्वृद्धिश्च

4.1.74 यङश्चाप् चाप् 75
4.1.75 आवट्याच्च
4.1.76 तद्धिताः 5.4.160
4.1.77 यूनस्तिः
4.1.78 अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे अणिञोः 79; ष्यङ् 81; गोत्रे 80
4.1.79 गोत्रावयवात्
4.1.80 क्रौड्यादिभ्यश्च
4.1.81 दैवयज्ञि-शौचिवृक्षि-सात्यमुग्रि-काण्ठेविद्धिभ्योऽन्यतरस्याम्

(तद्धितप्रत्यय-प्रकरणम्)

4.1.82 समर्थानां प्रथमाद्वा समर्थानां प्रथमाद् 5.2.140; वा 5.4.67
4.1.83 प्राग्दीव्यतोऽण् अण् 4.3.168
4.1.84 अश्वपत्यादिभ्यश्च
(वा०) गोरजादिप्रसङ्गे यत्
4.1.85 दित्यदित्यादित्य-पत्युत्तरपदाण्ण्यः
(वा०) देवाद्याञञौ
(वा०) बहिषष्टिलोपो यञ् च
(वा०) ईकक् च
4.1.86 उत्सादिभ्योऽञ्
4.1.87 स्त्रीपुंसाभ्यां नञ्-स्नञौ भवनात् 5.2.1
4.1.88 द्विगोर्लुगनपत्ये
4.1.89 गोत्रेऽलुगचि अचि 91
4.1.90 यूनि लुक् 91
4.1.91 फक्फिञोरन्यतरस्याम्

(तद्धितेष्वपत्याधिकार-प्रकरणम्)

4.1.92 तस्यापत्यम् 178
4.1.93 एको गोत्रे
4.1.94 गोत्राद्यून्यस्त्रियाम्
4.1.95 अत इञ् इञ् 97
4.1.96 बाह्वादिभ्यश्च
4.1.97 सुधातुरकङ् च
4.1.98 गोत्रे कुञ्जादिभ्यश्फञ् गोत्रे 111
4.1.99 नडादिभ्यः फक् फक् 103
4.1.100 हरितादिभ्योऽञः
4.1.101 यञिञोश्च
4.1.102 शरद्वच्छुनक-दर्भाद् भृगु-वत्साग्रायणेषु
4.1.103 द्रोण-पर्वत-जीवन्तादन्यतरस्याम्
4.1.104 अनृष्यानन्तर्ये बिदादिभ्योऽञ्
4.1.105 गर्गादिभ्यो यञ् यञ् 109
4.1.106 मधु-बभ्रोर्ब्राह्मण-कौशिकयोः
4.1.107 कपि-बोधादाङ्गिरसे आङ्गिरसे 109
4.1.108 वतण्डाच्च वतण्डात् 109
4.1.109 लुक् स्त्रियाम्
4.1.110 अश्वादिभ्यः फञ् फञ् 111
4.1.111 भर्गात् त्रैगर्ते
4.1.112 शिवादिभ्योऽण् अण् 119
4.1.113 अवृद्धाभ्यो नदी-मानुषीभ्यस्तन्नामिकाभ्यः
4.1.114 ऋष्यन्धक-वृष्णि-कुरुभ्यश्च
4.1.115 मातुरुत् सङ्ख्या-सं-भद्रपूर्वायाः
4.1.116 कन्यायाः कनीन च
4.1.117 विकर्ण-शुङ्ग-च्छगलाद् वत्स-भरद्वाजात्रिषु
4.1.118 पीलाया वा
4.1.119 ढक् च मण्डूकात्
4.1.120 स्त्रीभ्यो ढक् स्त्रीभ्यः 121; ढक् 127

4.1.121 द्व्यचः 122

4.1.122 इतश्चानिञः

4.1.123 शुभ्रादिभ्यश्च

4.1.124 विकर्ण-कुषीतकात् काश्यपे

4.1.125 भ्रुवो वुक् च

4.1.126 कल्याण्यादीनामिनङ् इनङ् 127

4.1.127 कुलटाया वा

4.1.128 चटकाया ऐरक्

4.1.129 गोधाया ढ्रक् गोधायाः 130; ढ्रक् 131

4.1.130 आरगुदीचाम्

4.1.131 क्षुद्राभ्यो वा

4.1.132 पितृष्वसुश्छण् पि..सुः 133; छण् 134

4.1.133 ढकि लोपः 134

4.1.134 मातृष्वसुश्च

4.1.135 चतुष्पाद्भ्यो ढञ् ढञ् 136

4.1.136 गृष्ट्यादिभ्यश्च

4.1.137 राज-श्वशुराद् यत्

(वा०) राज्ञो जातावेवेति वाच्यम्

4.1.138 क्षत्राद् घः

4.1.139 कुलात् खः कुलात् 140

4.1.140 अपूर्वपदादन्यतरस्यां यड्-ढकञौ अन्यतरस्याम् 142

4.1.141 महाकुलादञ्-खञौ

4.1.142 दुष्कुलाड् ढक्

4.1.143 स्वसुश्छः छः 144

4.1.144 भ्रातुर्व्यच्च भ्रातुः 145

4.1.145 व्यन् सपत्ने

4.1.146 रेवत्यादिभ्यष्ठक् ठक् 147

4.1.147 गोत्रस्त्रियाः कुत्सने ण च कु..ने 149

4.1.148 वृद्धाट् ठक् सौवीरेषु बहुलम् वृद्धात्, ठक् 149; सौवीरेषु बहुलम् 150

4.1.149 फेश्छ च

4.1.150 फाण्टाहृति-मिमताभ्यां ण-फिञौ

4.1.151 कुर्वादिभ्यो ण्यः ण्यः 152

(वा०) सम्राजः क्षत्रिये

4.1.152 सेनान्त-लक्षण-कारिभ्यश्च 153

4.1.153 उदीचामिञ्

4.1.154 तिकादिभ्यः फिञ् फिञ् 159

4.1.155 कौसल्य-कार्मार्याभ्यां च

4.1.156 अणो द्व्यचः

4.1.157 उदीचां वृद्धादगोत्रात् 159

4.1.158 वाकिनादीनां कुक् च कुक् 159

4.1.159 पुत्रान्तादन्यतरस्याम्

4.1.160 प्राचामवृद्धात् फिन् बहुलम्

4.1.161 मनोर्जातावञ्-यतौ षुक् च

4.1.162 अपत्यं पौत्रप्रभृति गोत्रम् अपत्यं पौत्रप्रभृति 165

4.1.163 जीवति तु वंश्ये युवा जीवति 164; युवा 165

4.1.164 भ्रातरि च ज्यायसि

4.1.165 वाऽन्यस्मिन् सपिण्डे स्थविरतरे जीवति

4.1.166 वृद्धस्य च पूजायाम्

4.1.167 यूनश्च कुत्सायाम्

4.1.168 जनपदशब्दात् क्षत्रियादञ् जनपदशब्दात् क्षत्रियाद् 178; अञ् 169

(वा०) क्षत्त्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्

(वा०) पूरोण् वक्तव्यः

(वा०) पाण्डोर्ड्यण्

4.1.169 साल्वेय-गान्धारिभ्यां च
4.1.170 द्व्यञ्-मगध-कलिङ्ग-सूरमसादण्
4.1.171 वृद्धेत्-कोसलाजादाञ् ञ्यङ्
4.1.172 कुरु-नादिभ्यो ण्यः
4.1.173 साल्वावयव-प्रत्यग्रथ-कलकूटा-श्मकादिञ्
4.1.174 ते तद्राजाः तद्राजाः 178
4.1.175 कम्बोजाल्लुक् लुक् 178
(वा०) कम्बोजादिभ्य इति वक्तव्यम्
4.1.176 स्त्रियामवन्ति-कुन्ति-कुरुभ्यश्च स्त्रियाम् 178
4.1.177 अतश्च
4.1.178 न प्राच्य-भर्गादि-यौधेयादिभ्यः

॥ इति अष्टाध्यायीसूत्रपाठे चतुर्थाध्यायस्य प्रथमः पादः ॥

अथ चतुर्थोऽध्यायस्य द्वितीयः पादः

(तद्धितेषु रक्ताद्यर्थ-प्रकरणम्)

4.2.1 तेन रक्तं रागात् तेन 12; रक्तं रागात् 2
4.2.2 लाक्षा-रोचनाट् ठक्
(वा०) नील्या अन्, पीतात् कत्, हरिद्रा-महारजनाभ्यामञ् इति वक्तव्यम्
4.2.3 नक्षत्रेण युक्तः कालः 6
4.2.4 लुबविशेषे लुप् 5
4.2.5 संज्ञायां श्रवणाश्वत्थाभ्याम्
4.2.6 द्वन्द्वाच्छः
4.2.7 दृष्टं साम 9
4.2.8 कलेर्ढक्
4.2.9 वामदेवाड् ड्यड्-ड्यौ
4.2.10 परिवृतो रथः 12
4.2.11 पाण्डु-कम्बलादिनिः
4.2.12 द्वैप-वैयाघ्रादञ्
4.2.13 कौमारापूर्ववचने
4.2.14 तत्रोद्धृतममत्रेभ्यः तत्र 20
4.2.15 स्थण्डिलाच्छयितरि व्रते
4.2.16 संस्कृतं भक्षाः संस्कृतम् 20; भक्षाः 19
4.2.17 शूलोखाद्यत्
4.2.18 दध्नष्ठक् ठक् 19
4.2.19 उदश्वितोऽन्यतरस्याम्
4.2.20 क्षीराड् ढञ्
4.2.21 साऽस्मिन् पौर्णमासीति 23
4.2.22 आग्रहायण्यश्वत्थाट् ठक् ठक् 23
4.2.23 विभाषा फाल्गुनी-श्रवणा-कार्त्तिकी-चैत्रीभ्यः
4.2.24 साऽस्य देवता 35
4.2.25 कस्येत्
4.2.26 शुक्राद् घन्
4.2.27 अपोनप्त्रपान्नप्तृभ्यां घः अ..म् 28
4.2.28 छ च छ 29
(वा०) शतरुद्राद् घश्च
4.2.29 महेन्द्राद् घाणौ च
4.2.30 सोमाट् ट्यण्

4.2.31 वाय्वृतु-पित्रुषसो यत् यत् 32
4.2.32 द्यावापृथिवी-शुनासीर-मरुत्वदग्नीषोम-वास्तोष्पति-गृहमेधाच्छ च
4.2.33 अग्नेर्ढक्
4.2.34 कालेभ्यो भववत्
4.2.35 महाराज-प्रोष्ठपदाट् ठञ्
(वा०) पूर्णमासादण् वक्तव्यः
4.2.36 पितृव्य-मातुल-मातामह-पितामहाः
4.2.37 तस्य समूहः तस्य 54; समूहः 51
4.2.38 भिक्षादिभ्योऽण्
4.2.39 गोत्रोक्षोष्ट्रोरभ्र-राज-राजन्य-राजपुत्र-वत्स-मनुष्याजाद् वुञ् वुञ् 40
(वा०) वृद्धाच्चेति वक्तव्यम्
4.2.40 केदाराद् यञ् च केदाराद् 41
4.2.41 ठञ् कवचिनश्च
4.2.42 ब्राह्मण-माणव-वाडवाद् यन्
4.2.43 ग्राम-जन-बन्धुभ्यस्तल्
(वा०) गजसहायाभ्यां चेति वक्तव्यम्
(वा०) अह्नः खः क्रतौ
4.2.44 अनुदात्तादेरञ् अञ् 45
4.2.45 खण्डिकादिभ्यश्च
4.2.46 चरणेभ्यो धर्मवत्
4.2.47 अचित्त-हस्ति-धेनोष्ठक्
4.2.48 केशाश्वाभ्यां यञ्-छावन्यतरस्याम्
4.2.49 पाशादिभ्यो यः यः 50
4.2.50 खल-गो-रथात्
4.2.51 इनि-त्र-कट्यचश्च
(वा०) खलादिभ्यः इनिर्वक्तव्यः
4.2.52 विषयो देशे 54
4.2.53 राजन्यादिभ्यो वुञ्
4.2.54 भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ
4.2.55 सोऽस्यादिरिति च्छन्दसः प्रगाथेषु सोऽस्य 56
4.2.56 संग्रामे प्रयोजन-योद्धृभ्यः
4.2.57 तदस्यां प्रहरणमिति क्रीडायां णः
4.2.58 घञः सास्यां क्रियेति ञः
4.2.59 तदधीते तद्वेद 66
4.2.60 क्रतूक्थादि-सूत्रान्ताट् ठक्
4.2.61 क्रमादिभ्यो वुन्
4.2.62 अनुब्राह्मणादिनिः
4.2.63 वसन्तादिभ्यष्ठक्
4.2.64 प्रोक्ताल्लुक् प्रोक्तात् 66; लुक् 65
4.2.65 सूत्राच्च कोपधात्
4.2.66 च्छन्दोब्राह्मणानि च तद्विषयाणि

(तद्धितेषु चातुरर्थिक-प्रकरणम्)

4.2.67 तदस्मिन्नस्तीति देशे तन्नाम्नि देशे तन्नाम्नि 70
4.2.68 तेन निर्वृत्तम्
4.2.69 तस्य निवासः तस्य 70
4.2.70 अदूरभवश्च
4.2.71 ओरञ् अञ् 76
4.2.72 मतोश्च बह्वजङ्गात्
4.2.73 बह्वचः कूपेषु कूपेषु 74
4.2.74 उदक् च विपाशः
4.2.75 सङ्कलादिभ्यश्च
4.2.76 स्त्रीषु सौवीर-साल्व-प्राक्षु
4.2.77 सुवास्त्वादिभ्योऽण् अण् 79
4.2.78 रोणी
4.2.79 कोपधाच्च

4.2.80 वुञ्-छण्-क-ठजिल-सेनि-र-ढञ्-ण्य-य-फक्-फिञिञ्-ञ्य-कक्-ठकोऽरीहण-कृशाश्वर्श्य-कुमुद-काश-तृण-प्रेक्षाश्म-सखि-संकाश-बल-पक्ष-कर्ण-सुतङ्गम-प्रगदिन्-वराह-कुमुदादिभ्यः

4.2.81 जनपदे लुप् लुप् 83

4.2.82 वरणादिभ्यश्च

4.2.83 शर्कराया वा

4.2.84 ठक्-छौ च

4.2.85 नद्यां मतुप् मतुप् 86

4.2.86 मध्वादिभ्यश्च

4.2.87 कुमुद-नड-वेतसेभ्यो ड्मतुप्

4.2.88 नड-शादाड् ड्वलच्

4.2.89 शिखाया वलच्

4.2.90 उत्करादिभ्यश्छः छः 91

4.2.91 नडादीनां कुक् च

(तद्धितेषु शैषिक-प्रकरणम्)

4.2.92 शेषे 4.3.133

4.2.93 राष्ट्रावारपाराद् घ-खौ

(वा०) अवरापारद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्

4.2.94 ग्रामाद् य-खञौ ग्रामाद् 95

4.2.95 कत्र्यादिभ्यो ढकञ् ढकञ् 96

4.2.96 कुल-कुक्षि-ग्रीवाभ्यः श्वास्यलङ्कारेषु

4.2.97 नद्यादिभ्यो ढक्

4.2.98 दक्षिणा-पश्चात्-पुरसस्त्यक्

4.2.99 कापिश्याः ष्फक् ष्फक् 100

4.2.100 रङ्कोरमनुष्येऽण् च

4.2.101 द्यु-प्रागपागुदक्-प्रतीचो यत्

4.2.102 कन्थायाष्ठक् कन्थायाः 103

4.2.103 वर्णौ वुक्

4.2.104 अव्ययात् त्यप् त्यप् 105

(वा०) अमेहक्व-तसि-त्रेभ्य एव

(वा०) त्यब्नेर्ध्रुव इति वक्तव्यम्

4.2.105 ऐषमो-ह्यः-श्वसोऽन्यतरस्याम्

4.2.106 तीर-रूप्योत्तरपदादञ्-ञ्यौ

4.2.107 दिक्पूर्वपदादसंज्ञायां ञः दि..पदाद् 108

4.2.108 मद्रेभ्योऽञ् अञ् 109

4.2.109 उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्

4.2.110 प्रस्थोत्तरपद-पलद्यादि-कोपधादण् अण् 113

4.2.111 कण्वादिभ्यो गोत्रे गोत्रे 113

4.2.112 इञश्च इञः 113

4.2.113 न द्व्यचः प्राच्य-भरतेषु

4.2.114 वृद्धाच्छः वृद्धात् 118

4.2.115 भवतष्ठक्-छसौ

4.2.116 काश्यादिभ्यष्ठञ्-ञिठौ ठञ्ञिठौ 118

(वा०) आपदादिपूर्वपदात् कालान्तात्

4.2.117 वाहीकग्रामेभ्यश्च

4.2.118 विभाषोशीनरेषु

4.2.119 ओर्देशे ठञ् ओः, ठञ् 120; देशे 145

4.2.120 वृद्धात् प्राचाम् वृद्धात् 126

4.2.121 धन्व-योपधाद् वुञ् वुञ् 130

4.2.122 प्रस्थ-पुर-वहान्ताच्च

4.2.123 रोपधेतोः प्राचाम्

4.2.124 जनपद-तदवध्योश्च ज..ध्योः 125

4.2.125 अवृद्धादपि बहुवचनविषयात् अवृद्धादपि 126

4.2.126 कच्छाग्नि-वक्त्र-वर्तोत्तरपदात्
4.2.127 धूमादिभ्यश्च
4.2.128 नगरात् कुत्सन-प्रावीण्ययोः
4.2.129 अरण्यान्मनुष्ये
4.2.130 विभाषा कुरु-युगन्धराभ्याम्
4.2.131 मद्र-वृज्योः कन्
4.2.132 कोपधादण् अण् 133
4.2.133 कच्छादिभ्यश्च क..भ्यः 134
4.2.134 मनुष्य-तत्स्थयोर्वुञ्
म..योः 135; वुञ् 136
4.2.135 अपदातौ साल्वात् साल्वात् 136
4.2.136 गो-यवाग्वोश्च
4.2.137 गर्तोत्तरपदाच्छः छः 4.3.1
4.2.138 गहादिभ्यश्च
(वा०) कुग्जनस्य परस्य च, देवस्य च, स्वस्य च, वेणुकादिभ्यश्छण् वाच्यः
4.2.139 प्राचां कटादेः
4.2.140 राज्ञः क च
4.2.141 वृद्धादकेकान्त-खोपधात् वृद्धात् 142
4.2.142 कन्था-पलद-नगर-ग्राम-ह्रदोत्तरपदात्
4.2.143 पर्वताच्च पर्वतात् 144
4.2.144 विभाषाऽमनुष्ये
4.2.145 कृकण-पर्णाद्भारद्वाजे

॥ इति अष्टाध्यायीसूत्रपाठे चतुर्थाध्यायस्य द्वितीयः पादः ॥

अथ चतुर्थोऽध्यायस्य तृतीयः पादः

4.3.1 युष्मदस्मदोरन्यतरस्यां खञ् च
युष्म..दोः 3
4.3.2 तस्मिन्नणि च युष्माकास्माकौ
तस्मिन्नणि च 3
4.3.3 तवक-ममकावेकवचने
4.3.4 अर्धाद् यत् अर्धाद् 7; यत् 6
4.3.5 परावराधमोत्तम-पूर्वाच्च
4.3.6 दिक्पूर्वपदाट् ठञ् च दिक्..दात् 7
4.3.7 ग्राम-जनपदैकदेशादञ्-ठञौ
4.3.8 मध्यान्मः मध्यात् 9
(वा०) आदेश्च
(वा०) अवोधसोर्लोपश्च
4.3.9 अ सांप्रतिके
4.3.10 द्वीपादनुसमुद्रं यञ्
4.3.11 कालाट् ठञ् कालाट् 24; ठञ् 15
4.3.12 श्राद्धे शरदः शरदः 13
4.3.13 विभाषा रोगातपयोः विभाषा 15
4.3.14 निशा-प्रदोषाभ्यां च
4.3.15 श्वसस्तुट् च
4.3.16 सन्धिवेलाद्यृतु-नक्षत्रेभ्योऽण्
4.3.17 प्रावृष एण्यः
4.3.18 वर्षाभ्यष्ठक् वर्षाभ्यः 19
4.3.19 छन्दसि ठञ् 21
4.3.20 वसन्ताच्च
4.3.21 हेमन्ताच्च हेमन्तात् 22
4.3.22 सर्वत्राण् च तलोपश्च

4.3.23 सायं-चिरं-प्राह्णे-प्रगेऽव्ययेभ्यष्ट्यु-ट्युलौ तुट् च ट्युट्युलौ तुट् 24
4.3.24 विभाषा पूर्वाह्णापराह्णाभ्याम्
4.3.25 तत्र जातः तत्र 51; जातः 37
4.3.26 प्रावृषष्ठप्
4.3.27 संज्ञायां शरदो वुञ् संज्ञायाम् 28
4.3.28 पूर्वाह्णापराह्णार्द्रा-मूल-प्रदोषावस्कराद् वुन् वुन् 30
4.3.29 पथः पन्थ च
4.3.30 अमावास्याया वा अमावास्यायाः 31
4.3.31 अ च
4.3.32 सिन्ध्वपकराभ्यां कन् सि..भ्याम् 33
4.3.33 अणञौ च
4.3.34 श्रविष्ठा-फल्गुन्यनुराधा-स्वाति-तिष्य-पुनर्वसु-हस्त-विशाखाऽषाढा-बहुलाल् लुक् लुक् 37
4.3.35 स्थानान्त-गोशाल-खरशालाच्च
4.3.36 वत्सशालाभिजिदश्वयुक्-छतभिषजो वा
4.3.37 नक्षत्रेभ्यो बहुलम्
4.3.38 कृत-लब्ध-क्रीत-कुशलाः
4.3.39 प्रायभवः 40
4.3.40 उपजानूपकर्णोपनीवेष्ठक्
4.3.41 सम्भूते 43
4.3.42 कोशाड् ढञ्
4.3.43 कालात् साधु-पुष्प्यत्-पच्यमानेषु कालात् 52
4.3.44 उप्ते च उप्ते 46
4.3.45 आश्वयुज्या वुञ् वुञ् 46
4.3.46 ग्रीष्म-वसन्तादन्यतरस्याम्
4.3.47 देयमृणे 50
4.3.48 कलाप्यश्वत्थ-यवबुसाद् वुन्
4.3.49 ग्रीष्मावरसमाद् वुञ् वुञ् 50
4.3.50 संवत्सराग्रहायणीभ्यां ठञ् च
4.3.51 व्याहरति मृगः
4.3.52 तदस्य सोढम्
4.3.53 तत्र भवः 73
4.3.54 दिगादिभ्यो यत् यत् 55
4.3.55 शरीरावयवाच्च
4.3.56 दृति-कुक्षि-कलशि-वस्त्यस्त्यहेर्ढञ् ढञ् 57
4.3.57 ग्रीवाभ्योऽण् च
4.3.58 गम्भीराञ्ञ्यः ञ्यः 59
(वा०) बहिर्देव-पञ्चजनेभ्यश्च
4.3.59 अव्ययीभावाच्च अव्ययीभावात् 61
4.3.60 अन्तःपूर्वपदाट् ठञ् ठञ् 61
(वा०) अध्यात्मादेष्ठञिष्यते
4.3.61 ग्रामात् पर्यनुपूर्वात्
4.3.62 जिह्वामूलाङ्गुलेश्छः छः 63
4.3.63 वर्गान्ताच्च वर्गान्तात् 64
4.3.64 अशब्दे यत्-खावन्यतरस्याम्
4.3.65 कर्ण-ललाटात् कनलङ्कारे
4.3.66 तस्य व्याख्यान इति च व्याख्यात-व्यनाम्नः तस्य व्याख्यानः व्या..म्नः 73
4.3.67 बह्वचोऽन्तोदात्ताट् ठञ् ठञ् 69
4.3.68 क्रतु-यज्ञेभ्यश्च
4.3.69 अध्यायेष्वेवर्षेः
4.3.70 पौरोडाश-पुरोडाशात् ष्ठन्

4.3.71 छन्दसो यदणौ
4.3.72 द्व्यजृद्-ब्राह्मणर्क्-प्रथमाध्वर-पुरश्चरण-नामाख्याताट् ठक्
4.3.73 अणृगयनादिभ्यः
4.3.74 तत आगतः ततः 84; आगतः 82
4.3.75 ठगायस्थानेभ्यः
4.3.76 शुण्डिकादिभ्योऽण्
4.3.77 विद्या-योनिसम्बन्धेभ्यो वुञ् वि..भ्यः 78
4.3.78 ऋतष्ठञ् ठञ् 79
4.3.79 पितुर्यच्च
4.3.80 गोत्रादङ्कवत्
4.3.81 हेतु-मनुष्येभ्योऽन्यतरस्यां रूप्यः हेतुमनुष्येभ्यः 82
4.3.82 मयट् च
4.3.83 प्रभवति 84
4.3.84 विदूराञ्ञ्यः
4.3.85 तद् गच्छति पथि-दूतयोः तद् 88
4.3.86 अभिनिष्क्रामति द्वारम्
4.3.87 अधिकृत्य कृते ग्रन्थे 88
4.3.88 शिशुक्रन्द-यमसभ-द्वन्द्वेन्द्रजननादि-भ्यश्छः
4.3.89 सोऽस्य निवासः सोऽस्य 100
4.3.90 अभिजनश्च अभिजनः 94
4.3.91 आयुधजीविभ्यश्छः पर्वते
4.3.92 शण्डिकादिभ्यो ञ्यः
4.3.93 सिन्धु-तक्षशिलादिभ्योऽणञौ
4.3.94 तूदी-शलातुर-वर्मती-कूचवाराड्-ढक्-छण्-ढञ्-यकः
4.3.95 भक्तिः 100
4.3.96 अचित्ताददेशकालाट् ठक्
4.3.97 महाराजाट् ठञ्
4.3.98 वासुदेवार्जुनाभ्यां वुन्
4.3.99 गोत्र-क्षत्रियाख्येभ्यो बहुलं वुञ्
4.3.100 जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने
4.3.101 तेन प्रोक्तम् 111
4.3.102 तित्तिरि-वरतन्तु-खण्डिकोखाच्छण्
4.3.103 काश्यप-कौशिकाभ्यामृषिभ्यां णिनिः णिनिः 106
4.3.104 कलापि-वैशम्पायनान्तेवासिभ्यश्च
4.3.105 पुराणप्रोक्तेषु ब्राह्मणकल्पेषु
4.3.106 शौनकादिभ्यश्छन्दसि
4.3.107 कठ-चरकाल्लुक्
4.3.108 कलापिनोऽण्
4.3.109 छगलिनो ढिनुक्
4.3.110 पाराशर्य-शिलालिभ्यां भिक्षु-नटसूत्रयोः भि..योः 111
4.3.111 कर्मन्द-कृशाश्वादिनिः
4.3.112 तेनैकदिक् तेन 119; एकदिक् 114
4.3.113 तसिश्च तसिः 114
4.3.114 उरसो यच्च
4.3.115 उपज्ञाते
4.3.116 कृते ग्रन्थे कृते 119
4.3.117 संज्ञायाम् 119
4.3.118 कुलालादिभ्यो वुञ्
4.3.119 क्षुद्रा-भ्रमर-वटर-पादपादञ्
4.3.120 तस्येदम् 133
4.3.121 रथाद्यत् रथात् 122

4.3.122 पत्त्रपूर्वादञ् अञ् 123
4.3.123 पत्त्राध्वर्यु-परिषदश्च
4.3.124 हल-सीराट् ठक्
4.3.125 द्वन्द्वाद् वुन् वैर-मैथुनिकयोः
4.3.126 गोत्र-चरणाद् वुञ्
4.3.127 सङ्घाङ्कलक्षणेष्वञ्यञिञामण् संघाङ्कलक्षणेषु 128
4.3.128 शाकलाद् वा
4.3.129 छन्दोगौक्थिक-याज्ञिक-बह्वृचनटाञ्ञ्यः
4.3.130 न दण्डमाणवान्तेवासिषु
4.3.131 रैवतिकादिभ्यश्छः
4.3.132 कौपिञ्जल-हास्तिपदादण् अण् 133
4.3.133 आथर्वणिकस्येकलोपश्च

(तद्धितेषु प्राग्दीव्यतीय-प्रकरणम्)

4.3.134 तस्य विकारः 138
4.3.135 अवयवे च प्राण्योषधि-वृक्षेभ्यः अवयवे च 138
4.3.136 बिल्वादिभ्योऽण् अण् 138
4.3.137 कोपधाच्च
4.3.138 त्रपु-जतुनोः षुक्
4.3.139 ओरञ् अञ् 141
4.3.140 अनुदात्तादेश्च
4.3.141 पलाशादिभ्यो वा
4.3.142 शम्याः ष्लञ्
4.3.143 मयड् वैतयोर्भाषायामभक्ष्याच्छादनयोः मयट् 151; भा..म्, अभ..योः 144
4.3.144 नित्यं वृद्ध-शरादिभ्यः
(वा०) एकाचो नित्यम्
4.3.145 गोश्च पुरीषे
4.3.146 पिष्टाच्च पिष्टात् 147
4.3.147 संज्ञायां कन्
4.3.148 व्रीहेः पुरोडाशे
4.3.149 असंज्ञायां तिल-यवाभ्याम्
4.3.150 द्व्यचश्छन्दसि 151
4.3.151 नोत्वद् वर्ध्र-बिल्वात्
4.3.152 तालादिभ्योऽण् अण् 153
4.3.153 जातरूपेभ्यः परिमाणे
4.3.154 प्राणि-रजतादिभ्योऽञ् अञ् 155
4.3.155 ञितश्च तत्प्रत्ययात्
4.3.156 क्रीतवत् परिमाणात्
4.3.157 उष्ट्राद् वुञ् वुञ् 158
4.3.158 उमोर्णयोर्वा
4.3.159 एण्या ढञ्
4.3.160 गो-पयसोर्यत् यत् 161
4.3.161 द्रोश्च द्रोः 162
4.3.162 माने वयः
4.3.163 फले लुक् फले 167
4.3.164 प्लक्षादिभ्योऽण् अण् 165
4.3.165 जम्ब्वा वा 166
4.3.166 लुप् च लुप् 167
(वा०) फल-पाक-शुषामुपसङ्ख्यानम्
(वा०) पुष्पमूलेषु बहुलम्
4.3.167 हरीतक्यादिभ्यश्च
4.3.168 कंसीय-परशव्ययोर्यञञौ लुक् च

॥ इति अष्टाध्यायीसूत्रपाठे चतुर्थाध्यायस्य तृतीयः पादः ॥

अथ चतुर्थोऽध्यायस्य चतुर्थः पादः

(तद्धितेषु प्राग्वहतीय-प्रकरणम्)

4.4.1 प्राग्वहतेष्ठक् ठक् 74
(वा०) गच्छतौ परदारादिभ्यः
4.4.2 तेन दीव्यति खनति जयति जितम् तेन 27
4.4.3 संस्कृतम् 4
4.4.4 कुलत्थ-कोपधादण्
4.4.5 तरति 7
4.4.6 गोपुच्छाट् ठञ्
4.4.7 नौ-द्व्यचष्ठन्
4.4.8 चरति 11
4.4.9 आकर्षात् ष्ठल्
4.4.10 पर्पादिभ्यः ष्ठन् ष्ठन् 11
4.4.11 श्वगणाट् ठञ्च
4.4.12 वेतनादिभ्यो जीवति जीवति 14
4.4.13 वस्न-क्रयविक्रयाट् ठन् ठन् 14
4.4.14 आयुधाच्छ च
4.4.15 हरत्युत्सङ्गादिभ्यः हरति 18
4.4.16 भस्त्रादिभ्यः ष्ठन् ष्ठन् 17
4.4.17 विभाषा विवधात्
4.4.18 अण् कुटिलिकायाः
4.4.19 निर्वृत्तेऽक्षद्यूतादिभ्यः निर्वृत्ते 21
4.4.20 त्रेर्मम्नित्यं
4.4.21 अपमित्य-याचिताभ्यां कक्-कनौ
4.4.22 संसृष्टे 25
4.4.23 चूर्णादिनिः
4.4.24 लवणाल्लुक्
4.4.25 मुद्गादण्
4.4.26 व्यञ्जनैरुपसिक्ते
4.4.27 ओजः-सहो-ऽम्भसा वर्तते वर्तते 29
4.4.28 तत् प्रत्यनुपूर्वमीपलोमकूलम् तत् 46
4.4.29 परिमुखं च
4.4.30 प्रयच्छति गर्ह्यम् 31
4.4.31 कुसीद-दशैकादशात् ष्ठन्-ष्ठचौ
4.4.32 उञ्छति
4.4.33 रक्षति
4.4.34 शब्द-दर्दुरं करोति
4.4.35 पक्षि-मत्स्य-मृगान् हन्ति
4.4.36 परिपन्थं च तिष्ठति
4.4.37 माथोत्तरपद-पदव्यनुपदं धावति धावति 38
4.4.38 आक्रन्दाट् ठञ् च
4.4.39 पदोत्तरपदं गृह्णाति गृह्णाति 40
4.4.40 प्रतिकण्ठार्थ-ललामं च
4.4.41 धर्मं चरति
(वा०) अधर्माच्चेति वक्तव्यम्
4.4.42 प्रतिपथमेति ठंश्च
4.4.43 समवायान् समवैति समवैति 45
4.4.44 परिषदो ण्यः ण्यः 45
4.4.45 सेनाया वा
4.4.46 संज्ञायां ललाट-कुक्कुट्यौ पश्यति
4.4.47 तस्य धर्म्यम् तस्य 50; धर्म्यम् 49
4.4.48 अण् महिष्यादिभ्यः
4.4.49 ऋतोऽञ्
4.4.50 अवक्रयः

4.4.51 तदस्य पण्यम् तदस्य 65; पण्यम् 54
4.4.52 लवणाट् ठञ्
4.4.53 किशरादिभ्यः ष्ठन् ष्ठन् 54
4.4.54 शलालुनोऽन्यतरस्याम्
4.4.55 शिल्पम् 56
4.4.56 मड्डुक-झर्झराद्यन्यतरस्याम्
4.4.57 प्रहरणम् 59
4.4.58 परश्वधाट् ठञ् च
4.4.59 शक्ति-यष्ट्योरीकक्
4.4.60 अस्ति नास्ति दिष्टं मतिः
4.4.61 शीलम् 62
4.4.62 छत्रादिभ्यो णः
4.4.63 कर्माध्ययने वृत्तम् 64
4.4.64 बह्वच्पूर्वपदाट् ठच्
4.4.65 हितं भक्षाः
4.4.66 तदस्मै दीयते नियुक्तम् 68
4.4.67 श्राणा-मांसौदनाट् टिठन्
4.4.68 भक्तादणन्यतरस्याम्
4.4.69 तत्र नियुक्तः तत्र 74; नियुक्तः 70
4.4.70 अगारान्ताट् ठन्
4.4.71 अध्यायिन्यदेशकालात्
4.4.72 कठिनान्त-प्रस्तार-संस्थानेषु व्यवहरति
4.4.73 निकटे वसति वसति 74
4.4.74 आवसथात् ष्ठल्

(तद्धितेषु प्राग्घितीय-प्रकरणम्)

4.4.75 प्राग्घिताद् यत् यत् 5.1.4
4.4.76 तद्वहति रथ-युग-प्रासङ्गम् तद् 86; वहति 82
4.4.77 धुरो यड्-ढकौ
4.4.78 खः सर्वधुरात् खः 79
4.4.79 एकधुराल्लुक् च
4.4.80 शकटादण्
4.4.81 हल-सीराट् ठक्
4.4.82 संज्ञायां जन्याः
4.4.83 विध्यत्यधनुषा
4.4.84 धन-गणं लब्धा लब्धा 85
4.4.85 अन्नाण्णः
4.4.86 वशं गतः
4.4.87 पदमस्मिन् दृश्यम्
4.4.88 मूलमस्याबर्हि
4.4.89 संज्ञायां धेनुष्या
4.4.90 गृहपतिना संयुक्ते ञ्यः
4.4.91 नौ-वयो-धर्म-विष-मूल-मूल-सीता-तुलाभ्यस्तार्य-तुल्य-प्राप्य-वध्यानाम्य-सम-समित-सम्मितेषु
4.4.92 धर्म-पथ्यर्थ-न्यायादनपेते
4.4.93 छन्दसो निर्मिते निर्मिते 94
4.4.94 उरसोऽण् च
4.4.95 हृदयस्य प्रियः हृदयस्य 96
4.4.96 बन्धने चर्षौ
4.4.97 मत-जन-हलात् करण-जल्प-कर्षेषु
4.4.98 तत्र साधुः तत्र 119; साधुः 106
4.4.99 प्रतिजनादिभ्यः खञ्
4.4.100 भक्ताण्णः
4.4.101 परिषदो ण्यः
4.4.102 कथादिभ्यष्ठक्
4.4.103 गुडादिभ्यष्ठञ्
4.4.104 पथ्यतिथि-वसति-स्वपतेर्ढञ्

4.4.105 सभाया यः सभायाः 106
4.4.106 ढश्छन्दसि
4.4.107 समानतीर्थे वासी
4.4.108 समानोदरे शयित ओ चोदात्तः शयितः 109
4.4.109 सोदराद् यः
4.4.110 भवे छन्दसि भवे 118; छन्दसि 144
4.4.111 पाथो-नदीभ्यां ड्यण्
4.4.112 वेशन्त-हिमवद्भ्यामण्
4.4.113 स्रोतसो विभाषा ड्यड्-ड्यौ
4.4.114 सगर्भ-सयूथ-सनुताद् यन्
4.4.115 तुग्राद् घन्
4.4.116 अग्राद् यत् अग्राद् 117
4.4.117 घ-च्छौ च
4.4.118 समुद्राभ्राद् घः
4.4.119 बर्हिषि दत्तम्
4.4.120 दूतस्य भाग-कर्मणी
4.4.121 रक्षो-यातूनां हननी
4.4.122 रेवती-जगती-हविष्याभ्यः प्रशस्ये
4.4.123 असुरस्य स्वम् असुरस्य 124
4.4.124 मायायामण्
4.4.125 तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः 127
4.4.126 अश्विमानण्
4.4.127 वयस्यासु मूर्ध्नो मतुप्
4.4.128 मत्वर्थे मास-तन्वोः मत्वर्थे 132
(वा०) लगकारेकाररफाश्च वक्तव्याः
4 4.129 मधोर्ञ च
4.4.130 ओजसोऽहनि यत्-खौ
4.4.131 वेशो-यशआदेर्भगाद् यल् 132
4.4.132 ख च ख 133
4.4.133 पूर्वैः कृतमिन-यौ च
4.4.134 अद्भिः संस्कृतम्
4.4.135 सहस्रेण संमितौ घः सहस्रेण, घः 136
4.4.136 मतौ च
4.4.137 सोममर्हति यः सोमम्, यः 137
4.4.138 मये च मये 140
4.4.139 मधोः
4.4.140 वसोः समूहे च
4.4.141 नक्षत्राद् घः
4.4.142 सर्व-देवात् तातिल् तातिल् 144
4.4.143 शिव-शमरिष्टस्य करे शि..स्य 144
4.4.144 भावे च

॥ इति अष्टाध्यायीसूत्रपाठे चतुर्थाध्यायस्य चतुर्थः पादः ॥

॥ इति अष्टाध्यायीसूत्रपाठे चतुर्थोऽध्यायः॥

अथ पञ्चमोऽध्यायः

अथ प्रथमः पादः

(तद्धितेषु छ-यद्विधि-प्रकरणम्)

5.1.1 प्राक् क्रीताच्छः 35

5.1.2 उगवादिभ्यो यत् यत् 4

(वा०) शुनः सम्प्रसारणं वा च दीर्घत्वम्

(वा०) नाभि नभं च

5.1.3 कम्बलाच्च संज्ञायाम्

5.1.4 विभाषा हविरपूपादिभ्यः

5.1.5 तस्मै हितम् 11

5.1.6 शरीरावयवाद् यत् यत् 7

5.1.7 खल-यव-माष-तिल-वृष-ब्रह्मणश्च

5.1.8 अजाविभ्यां थ्यन्

5.1.9 आत्मन्-विश्वजन-भोगोत्तरपदात् खः

(वा०) सर्वजनाट् ठञ् खश्च

5.1.10 सर्व-पुरुषाभ्यां ण-ढञौ

5.1.11 माणव-चरकाभ्यां खञ्

5.1.12 तदर्थं विकृतेः प्रकृतौ 15

5.1.13 छदिरुपधि-बलेर्ढञ्

5.1.14 ऋषभोपानहोर्ञ्यः

5.1.15 चर्मणोऽञ्

5.1.16 तदस्य तदस्मिन् स्यादिति 17

5.1.17 परिखाया ढञ्

(तद्धितेषु प्राग्वतीयाः)

5.1.18 प्राग्वतेष्ठञ् ठञ् 114

(प्राग्वतीयेष्वार्हीय-प्रकरणम्)

5.1.19 आर्हादगोपुच्छ-सङ्ख्या-परिमाणाट् ठक् आर्हात् 36; ठक् 71

5.1.20 असमासे निष्कादिभ्यः

5.1.21 शताच्च ठन्-यतावशते

5.1.22 सङ्ख्याया अति-शदन्तायाः कन् कन् 24

5.1.23 वतोरिड् वा

5.1.24 विंशति-त्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्

5.1.25 कंसाट् टिठन्

5.1.26 शूर्पादञन्यतरस्याम्

5.1.27 शतमान-विंशतिक-सहस्र-वसनादण्

5.1.28 अध्यर्धपूर्व-द्विगोर्लुगसंज्ञायाम् अ..गोः 35; लुक् 31

5.1.29 विभाषा कार्षापण-सहस्राभ्याम् विभाषा 31

5.1.30 द्वि-त्रिपूर्वान्निष्कात् द्वि..र्वात् 31

5.1.31 बिस्ताच्च

5.1.32 विंशतिकात् खः

5.1.33 खार्या ईकन्

5.1.34 पण-पाद-माष-शताद् यत् यत् 36

5.1.35 शाणाद् वा शाणात् 36

5.1.36 द्वि-त्रिपूर्वादण् च

5.1.37 तेन क्रीतम्

5.1.38 तस्य निमित्तं संयोगोत्पातौ 41

5.1.39 गो-द्व्यचोऽसङ्ख्या-परिमाणाश्वादेर्यत् यत् 40

5.1.40 पुत्राच्छ च

5.1.41 सर्वभूमि-पृथिवीभ्यामणञौ 43

5.1.42 तस्येश्वरः

5.1.43 तत्र विदित इति च तत्र विदितः 44

5.1.44 लोकसर्वलोकाट् ठञ्

5.1.45 तस्य वापः 46

5.1.46 पात्रात् ष्ठन्

5.1.47 तदस्मिन् वृद्ध्याय-लाभ-शुल्कोपदा दीयते 49

5.1.48 पूरणार्द्धाट् ठन् ठन् 49

5.1.49 भागाद् यच्च

5.1.50 तद्धरति वहत्यावहति भाराद्वंशादिभ्यः तद् 55; हरति वहत्यावहति 51

5.1.51 वस्न-द्रव्याभ्यां ठन्-कनौ

5.1.52 सम्भवत्यवहरति पचति 55

5.1.53 आढकाचित-पात्रात् खोऽन्यतरस्याम् आ..त्रात् 54; अन्य..म् 55

5.1.54 द्विगोः ष्ठंश्च द्विगोः ष्ठन् 55

5.1.55 कुलिजाल् लुक्-खौ च

5.1.56 सोऽस्यांश-वस्न-भृतयः

5.1.57 तदस्य परिमाणम् 62

5.1.58 सङ्ख्यायाः संज्ञा-संघ-सूत्राध्ययनेषु

5.1.59 पङ्क्ति-विंशति-त्रिंशच्-चत्वारिंशत्-पञ्चाशत्-षष्टि-सप्तत्यशीति-नवति-शतम्

5.1.60 पञ्चद्-दशतौ वर्गे वा वर्गे 61

5.1.61 सप्तनोऽञ् च्छन्दसि

5.1.62 त्रिंशच्-चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्

5.1.63 तदर्हति तद् 76; अर्हति 71

5.1.64 छेदादिभ्यो नित्यम् नित्यम् 65

5.1.65 शीर्षच्छेदाद् यच्च यत् 70

5.1.66 दण्डादिभ्यः

5.1.67 छन्दसि च

5.1.68 पात्राद् घंश्च

5.1.69 कडङ्गर-दक्षिणाच्छ च

5.1.70 स्थालीबिलात्

5.1.71 यज्ञर्त्विग्भ्यां घ-खञौ

(प्राग्वतीयाः)

5.1.72 पारायण-तुरायण-चान्द्रायणं वर्तयति

5.1.73 संशयमापन्नः

5.1.74 योजनं गच्छति गच्छति 77

5.1.75 पथः ष्कन् पथः 76

5.1.76 पन्थो ण नित्यम्

5.1.77 उत्तरपथेनाहृतं च

(प्राग्वतीयेषु कालाधिकार-प्रकरणम्)

5.1.78 कालात् 96

5.1.79 तेन निर्वृत्तम्

5.1.80 तमधीष्टो भृतो भूतो भावी

5.1.81 मासाद्वयसि यत्-खञौ मासात् 82; वयसि 83

5.1.82 द्विगोर्यप् यप् 83

5.1.83 षण्मासाण्ण्यच्च षण्..ण्यत् 84

5.1.84 अवयसि ठंश्च

5.1.85 समायाः खः समायाः 86; खः 88

5.1.86 द्विगोर्वा द्विगोः 89; वा 88

5.1.87 रात्र्यहःसंवत्सराच्च

5.1.88 वर्षाल्लुक् च वर्षात् 89

5.1.89 चित्तवति नित्यम्

5.1.90 षष्टिकाः षष्टिरात्रेण पच्यन्ते

5.1.91 वत्सरान्ताच्छश्छन्दसि 92

5.1.92 सं-परिपूर्वात् ख च

5.1.93 तेन परिजय्य-लभ्य-कार्य-सुकरम्

5.1.94 तदस्य ब्रह्मचर्यम्
(वा०) गुणवचनेभ्यो मतुपो लुगिष्टः
5.1.95 तस्य च दक्षिणा यज्ञाख्येभ्यः
5.1.96 तत्र च दीयते कार्यं भववत्
तत्र 97; दीयते कार्यम् 98

(प्राग्वतीयाः)

5.1.97 व्युष्टादिभ्योऽण्
5.1.98 तेन यथाकथाच-हस्ताभ्यां ण-यतौ
5.1.99 सम्पादिनि 100
5.1.100 कर्म-वेषाद् यत्
5.1.101 तस्मै प्रभवति संतापादिभ्यः
तस्मै प्रभवति 103
5.1.102 योगाद्यच्च
5.1.103 कर्मण उकञ्
5.1.104 समयस्तदस्य प्राप्तम्
तदस्य 114; प्राप्तम् 107
5.1.105 ऋतोरण् ऋतोः 106
5.1.106 छन्दसि घस्
5.1.107 कालाद् यत् कालात् 108
5.1.108 प्रकृष्टे ठञ्
5.1.109 प्रयोजनम् 113
5.1.110 विशाखाषाढादण् मन्थ-दण्डयोः
5.1.111 अनुप्रवचनादिभ्यश्छः छः 112
5.1.112 समापनात् सपूर्वपदात्
5.1.113 ऐकागारिकट् चौरे
5.1.114 आकालिकडाद्यन्तवचने

(तद्धितेषु वतिप्रत्ययः)

5.1.115 तेन तुल्यं क्रिया चेद् वतिः वतिः 118
5.1.116 तत्र तस्येव
5.1.117 तदर्हम्
5.1.118 उपसर्गाच्छन्दसि धात्वर्थे

(तद्धितेषु भावकर्मार्थ-प्रकरणम्)

5.1.119 तस्य भावस्त्व-तलौ
तस्य भावः 136; त्वतलौ 135
5.1.120 आ च त्वात् 135
5.1.121 न नञ्पूर्वात् तत्पुरुषादचतुर-सङ्गत-लवण-वट-युध-कत-रस-लसेभ्यः
5.1.122 पृथ्वादिभ्य इमनिज् वा इमनिज्वा 123
5.1.123 वर्ण-दृढादिभ्यः ष्यञ् च ष्यञ् 124
5.1.124 गुणवचन-ब्राह्मणादिभ्यः कर्मणि च
कर्मणि 136
(वा०) चातुर्वर्ण्यादीनां स्वार्थ उपसङ्ख्यानम्
5.1.125 स्तेनाद् यन् नलोपश्च
5.1.126 सख्युर्यः
5.1.127 कपि-ज्ञात्योर्ढक्
5.1.128 पत्यन्त-पुरोहितादिभ्यो यक्
5.1.129 प्राणभृज्जाति-वयोवचनोद्गात्रादिभ्योऽञ्
5.1.130 हायनान्त-युवादिभ्योऽण् अण् 131
5.1.131 इगन्ताच्च लघुपूर्वात्
5.1.132 योपधाद् गुरूपोत्तमाद् वुञ् वुञ् 134
(वा०) सहायाद् वा
5.1.133 द्वन्द्व-मनोज्ञादिभ्यश्च
5.1.134 गोत्र-चरणाच्छ्लाघात्याकारतदवेतेषु
5.1.135 होत्राभ्यश्छः होत्राभ्यः 136
5.1.136 ब्रह्मणस्त्वः

॥ इति अष्टाध्यायीसूत्रपाठे पञ्चमाध्यायस्य प्रथमः पादः ॥

अथ पञ्चमोऽध्यायस्य द्वितीयः पादः

(तद्धितेषु पाञ्चमिक-प्रकरणम्)

5.2.1 धान्यानां भवने क्षेत्रे खञ् धा..त्रे 4

5.2.2 व्रीहि-शाल्योर्ढक्

5.2.3 यव-यवक-षष्टिकाद् यत् यत् 4

5.2.4 विभाषा तिल-माषोमा-भङ्गाणुभ्यः

5.2.5 सर्वचर्मणः कृतः ख-खञौ

5.2.6 यथामुख-संमुखस्य दर्शनः खः खः 15

5.2.7 तत् सर्वादेः पथ्यङ्ग-कर्म-पत्र-पात्रं व्याप्नोति तत् 17

5.2.8 आप्रपदं प्राप्नोति

5.2.9 अनुपद-सर्वान्नायानयं बद्धा-भक्षयति-नेयेषु

5.2.10 परोवर-परम्पर-पुत्रपौत्रमनुभवति

5.2.11 अवारपारात्यन्तानुकामं गामी

5.2.12 समांसमां विजायते विजायते 13

5.2.13 अद्यश्वीनाऽवष्टब्धे

5.2.14 आगवीनः

5.2.15 अनुग्वलङ्गामी अलङ्गामी 17

5.2.16 अध्वनो यत्-खौ यत्खौ 17

5.2.17 अभ्यमित्राच्छ च

5.2.18 गोष्ठात् खञ् भूतपूर्वे खञ् 23

5.2.19 अश्वस्यैकाहगमः

5.2.20 शालीन-कौपीने अधृष्टाकार्ययोः

5.2.21 व्रातेन जीवति

5.2.22 साप्तपदीनं सख्यम्

5.2.23 हैयङ्गवीनं संज्ञायाम्

5.2.24 तस्य पाकमूले पील्वदि-कर्णादिभ्यः कुणब्-जाहचौ तस्य मूलम् 25

5.2.25 पक्षात् तिः

5.2.26 तेन वित्तश्चुञ्चुप्-चणपौ

5.2.27 वि-नञ्भ्यां ना-नाजौ न सह

5.2.28 वेः शालच्-छङ्कटचौ वेः 29

5.2.29 संप्रोदश्च कटच् कटच् 30

(वा०) विकारे स्नेहे तैलच्

5.2.30 अवात् कुटारच्च अवात् 31

5.2.31 नते नासिकायाः संज्ञायां टीटञ्-नाटज्-भ्रटचः नते नासिकायाः 33; संज्ञायाम् 34

5.2.32 नेर्बिडज्-बिरीसचौ नेः 33

5.2.33 इनच्-पिटच् चिक-चि च

5.2.34 उपाधिभ्यां त्यकन्नासन्नारूढयोः

5.2.35 कर्मणि घटोऽठच्

5.2.36 तदस्य सञ्जातं तारकादिभ्य इतच् तदस्य 44

5.2.37 प्रमाणे द्वयसज्-दघ्नञ्-मात्रचः 38

5.2.38 पुरुष-हस्तिभ्यामण् च

5.2.39 यत्-तदेतेभ्यः परिमाणे वतुप् वतुप् 41

5.2.40 किमिदम्भ्यां वो घः वो घः 41

5.2.41 किमः सङ्ख्यापरिमाणे डति च

5.2.42 सङ्ख्याया अवयवे तयप्

5.2.43 द्वि-त्रिभ्यां तयस्यायज् वा त..वा 44

5.2.44 उभादुदात्तो नित्यम्

(तद्धितेषु डादिप्रत्यय-प्रकरणम्)

5.2.45 तदस्मिन्नधिकमिति दशान्ताड् डः तदस्मिन्नधिकमिति 46

5.2.46 शदन्त-विंशतेश्च

5.2.47 सङ्ख्याया गुणस्य निमाने मयट्
सङ्ख्यायाः 58

5.2.48 तस्य पूरणे डट् तस्य पूरणे 58; डट् 53

5.2.49 नान्तादसङ्ख्यादेर्मट् ना..देः 50

5.2.50 थट् च छन्दसि

5.2.51 षट्-कति-कतिपय-चतुरां थुक्

(वा०) चतुरश्छयतावाद्यक्षरलोपश्च

5.2.52 बहु-पूग-गण-संघस्य तिथुक्

5.2.53 वतोरिथुक्

5.2.54 द्वेस्तीयः तीयः 55

5.2.55 त्रेः संप्रसारणं च

5.2.56 विंशत्यादिभ्यस्तमडन्यतरस्याम्
तमट् 58

5.2.57 नित्यं शतादि-मासार्धमास-संवत्सराच्च

5.2.58 षष्ट्यादेश्चासङ्ख्यादेः

5.2.59 मतौ छः सूक्त-साम्नोः मतौ छः 62

5.2.60 अध्यायानुवाकयोर्लुक् अ..योः 62

5.2.61 विमुक्तादिभ्योऽण्

5.2.62 गोषदादिभ्यो वुन् वुन् 63

5.2.63 तत्र कुशलः पथः तत्र 67; कुशलः 64

5.2.64 आकर्षादिभ्यः कन् कन् 82

5.2.65 धन-हिरण्यात् कामे

5.2.66 स्वाङ्गेभ्यः प्रसिते प्रसिते 67

5.2.67 उदराट् ठगाद्यूने

5.2.68 सस्येन परिजातः

5.2.69 अंशं हारी

5.2.70 तन्त्रादचिरापहृते

5.2.71 ब्राह्मणकोष्णिके संज्ञायाम्

5.2.72 शीतोष्णाभ्यां कारिणि

5.2.73 अधिकम्

5.2.74 अनुकाभिकाभीकः कमिता

5.2.75 पार्श्वेनान्विच्छति अन्विच्छति 76

5.2.76 अयःशूल-दण्डाजिनाभ्यां ठक्-ठञौ

5.2.77 तावतिथं ग्रहणमिति लुग् वा

5.2.78 स एषां ग्रामणीः

5.2.79 शृङ्खलमस्य बन्धनं करभे

5.2.80 उत्क उन्मनाः

5.2.81 काल-प्रयोजनाद् रोगे

5.2.82 तदस्मिन्नन्नं प्राये संज्ञायाम् 83

5.2.83 कुल्माषादञ्

5.2.84 श्रोत्रियंश्छन्दोऽधीते

5.2.85 श्राद्धमनेन भुक्तमिनि-ठनौ अनेन 88

5.2.86 पूर्वादिनिः पूर्वात् 87; इनिः 91

5.2.87 सपूर्वाच्च

5.2.88 इष्टादिभ्यश्च

5.2.89 छन्दसि परिपन्थि-परिपरिणौ पर्यवस्थातरि

5.2.90 अनुपद्यन्वेष्टा

5.2.91 साक्षाद् द्रष्टरि संज्ञायाम्

5.2.92 क्षेत्रियच् परक्षेत्रे चिकित्स्यः

5.2.93 इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्ट-
मिन्द्रजुष्टमिन्द्रदत्तमिति वा

(तद्धितेषु मत्वर्थीय-प्रकरणम्)

5.2.94 तदस्यास्त्यस्मिन्निति मतुप् 140

5.2.95 रसादिभ्यश्च

5.2.96 प्राणिस्थादातो लजन्यतरस्याम्
लच् 99; अन्यतरस्याम् 140

5.2.97 सिध्मादिभ्यश्च

5.2.98 वत्सांसाभ्यां काम-बले
5.2.99 फेनादिलच् च
5.2.100 लोमादि-पामादि-पिच्छादिभ्यः श-नेलचः
5.2.101 प्रज्ञा-श्रद्धार्चाभ्यो णः
5.2.102 तपः-सहस्राभ्यां विनीनी त..म् 103
5.2.103 अण् च अण् 105
5.2.104 सिकता-शर्कराभ्यां च सि..म् 105
5.2.105 देशे लुबिलचौ च
5.2.106 दन्त उन्नत उरच्
5.2.107 ऊष-सुषि-मुष्क-मधो रः
(वा०) रप्रेकरणे ख-मुख-कुञ्जेभ्य उपसङ्ख्यानम्
5.2.108 द्यु-द्रुभ्यां मः
5.2.109 केशाद् वोऽन्यतरस्याम् वः 110
(वा०) अन्येभ्योऽपि दृश्यते
(वा०) अर्णसो लोपश्च
5.2.110 गाण्ड्यजगात् संज्ञायाम्
5.2.111 काण्डाण्डादीरन्नीरचौ
5.2.112 रजः-कृष्यासुती-परिषदो वलच् वलच् 113
(वा०) वलच्प्रकरणेऽन्येभ्योऽपि दृश्यते
5.2.113 दन्त-शिखात् संज्ञायाम् सं..म् 114
5.2.114 ज्योत्स्ना-तमिस्रा-शृङ्गिणोर्जस्विन्नूर्ज-स्वल-गोमिन्-मलिन-मलीमसाः
5.2.115 अत इनि-ठनौ इनिठनौ 117
5.2.116 व्रीह्यादिभ्यश्च
5.2.117 तुन्दादिभ्य इलच् च
5.2.118 एक-गोपूर्वाट् ठञ् नित्यम् ठञ् 119
5.2.119 शत-सहस्रान्ताच्च निष्कात्
5.2.120 रूपादाहत-प्रशंसयोर्यप्
(वा०) यप्प्रकरणेऽन्येभ्योऽपि दृश्यते
5.2.121 अस्-माया-मेधा-स्रजो विनिः विनिः 122
5.2.122 बहुलं छन्दसि छन्दसि 123
5.2.123 ऊर्णाया युस्
5.2.124 वाचो ग्मिनिः वाचः 125
5.2.125 आलजाटचौ बहुभाषिणि
5.2.126 स्वामिन्नैश्वर्ये
5.2.127 अर्शआदिभ्योऽच्
5.2.128 द्वन्द्वोपताप-गर्ह्यात् प्राणिस्थादिनिः इनिः 137
5.2.129 वातातिसाराभ्यां कुक् च
5.2.130 वयसि पूरणात्
5.2.131 सुखादिभ्यश्च
5.2.132 धर्म-शील-वर्णान्ताच्च
5.2.133 हस्ताज्जातौ
5.2.134 वर्णाद् ब्रह्मचारिणि
5.2.135 पुष्करादिभ्यो देशे
(वा०) अर्थाच्चासन्निहिते
(वा०) तदन्ताच्चेति वक्तव्यम्
5.2.136 बलादिभ्यो मतुबन्यतरस्याम्
5.2.137 संज्ञायां मन्-माभ्याम्
5.2.138 कं-शम्भ्यां ब-भ-युस्-ति-तु-त-यसः
5.2.139 तुन्दि-वलि-वटेर्भः
5.2.140 अहम्-शुभमोर्युस्

॥ इति अष्टाध्यायीसूत्रपाठे पञ्चमाध्यायस्य द्वितीयः पादः ॥

अथ पञ्चमोऽध्यायस्य तृतीयः पादः

अथ स्वार्थिकाः

(तद्धितेषु प्राग्दिशीय-प्रकरणम्)

5.3.1 प्राग्दिशो विभक्तिः 26

5.3.2 किं-सर्वनाम-बहुभ्योऽद्व्यादिभ्यः 26

5.3.3 इदम इश् इदमः 4

5.3.4 एतेतौ र-थोः

5.3.5 एतदोऽन्

5.3.6 सर्वस्य सोऽन्यतरस्यां दि

5.3.7 पञ्चम्यास्तसिल् तसिल् 9

5.3.8 तसेश्च

5.3.9 पर्यभिभ्यां च

5.3.10 सप्तम्यास्त्रल् सप्तम्याः 22

5.3.11 इदमो हः

5.3.12 किमोऽत् किमः 13

5.3.13 वा ह च च्छन्दसि

5.3.14 इतराभ्योऽपि दृश्यन्ते

5.3.15 सर्वैकान्य-किं-यत्तदः काले दा काले 22

5.3.16 इदमो र्हिल् इदमः 18

5.3.17 अधुना

5.3.18 दानीं च दानीम् 19

5.3.19 तदो दा च

5.3.20 तयोर्दा-र्हिलौ च च्छन्दसि

5.3.21 अनद्यतने र्हिलन्यतरस्याम्

5.3.22 सद्यः परुत् परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युर-धरेद्युरुभयेद्युरुत्तरेद्युः

5.3.23 प्रकारवचने थाल् प्र..ने 26

5.3.24 इदमस्थमुः थमुः 25

(वा०) एतदोऽपि वाच्यः

5.3.25 किमश्च किमः 26

5.3.26 था हेतौ च च्छन्दसि

(तद्धितेषु दिगाद्यर्थकाः)

5.3.27 दिक्शब्देभ्यः सप्तमी-पञ्चमी-प्रथमाभ्यो दिग्-देश-कालेष्वस्तातिः दिक्श..षु 41

5.3.28 दक्षिणोत्तराभ्यामतसुच् अतसुच् 29

5.3.29 विभाषा परावराभ्याम्

5.3.30 अञ्चेर्लुक्

5.3.31 उपर्युपरिष्टात्

5.3.32 पश्चात्

5.3.33 पश्च पश्चा च च्छन्दसि

5.3.34 उत्तराधर-दक्षिणादातिः उत्त..णात् 35

5.3.35 एनबन्यतरस्यामदूरेऽपञ्चम्याः अपञ्चम्याः 38

5.3.36 दक्षिणादाच् दक्षिणात् 37; आच् 38

5.3.37 आहि च दूरे आहि, दूरे 38

5.3.38 उत्तराच्च

5.3.39 पूर्वाधरावराणामसि पुरधवश्चैषाम् पू..णाम्, पुरधवः 40

5.3.40 अस्ताति च अस्ताति 41

5.3.41 विभाषाऽवरस्य

5.3.42 सङ्ख्याया विधार्थे धा सङ्ख्यायाः, धा 43

5.3.43 अधिकरणविचाले च

5.3.44 एकाद्धो ध्यमुञन्यारयाम् धः, अन्यतरस्याम् 46

5.3.45 द्वि-त्र्योश्च धमुञ् द्वित्र्योः 46
5.3.46 एधाच्च
5.3.47 याप्ये पाशप्
5.3.48 पूरणाद्भागे तीयादन्
पूरणात् 49; भागे 51; अन् 50
5.3.49 प्रागेकादशभ्योऽच्छन्दसि
अच्छन्दसि 50
5.3.50 षष्ठाष्टमाभ्यां ञ च ष..भ्याम् 51
5.3.51 मान-पश्वङ्गयोः कन्-लुकौ च
कन्लुकौ 52
5.3.52 एकादाकिनिच्चासहाये
5.3.53 भूतपूर्वे चरट् चरट् 54
5.3.54 षष्ठ्या रूप्य च
5.3.55 अतिशायने तमबिष्ठनौ
अतिशायने 57; तमप् 56
5.3.56 तिङश्च 85
5.3.57 द्विवचन-विभज्योपपदे तरबीयसुनौ
5.3.58 अजादी गुणवचनादेव अजादी 65
5.3.59 तुश्छन्दसि
5.3.60 प्रशस्यस्य श्रः प्रशस्यस्य 61
5.3.61 ज्य च ज्य 62
5.3.62 वृद्धस्य च
5.3.63 अन्तिक-बाढयोर्नेद-साधौ
5.3.64 युवाल्पयोः कनन्यतरस्याम्
5.3.65 विन्-मतोर्लुक्
5.3.66 प्रशंसायां रूपप्
5.3.67 ईषदसमाप्तौ कल्पब्-देश्य-देशीयरः
ईषदसमाप्तौ 68
5.3.68 विभाषा सुपो बहुच् पुरस्तात्तु सुपः 69
5.3.69 प्रकारवचने जातीयर्

(तद्धितेषु प्रागिवीय-प्रकरणम्)

5.3.70 प्रागिवात् कः 95
5.3.71 अव्यय-सर्वनाम्नामकच् प्राक् टेः 95
(वा०) ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः
प्रागकच्, अन्यत्र सुबन्तस्य
5.3.72 कस्य च दः 95
5.3.73 अज्ञाते
5.3.74 कुत्सिते 75
5.3.75 संज्ञायां कन्
5.3.76 अनुकम्पायाम् 82
5.3.77 नीतौ च तद्युक्तात्
नीतौ 81; तद्युक्तात् 80
5.3.78 बह्वचो मनुष्यनाम्नष्ठज् वा
बह्वचः, ठज्वा 80; मनुष्यनाम्नः 82
5.3.79 घनिलचौ च घनिलचौ 80
5.3.80 प्राचामुपादेरडज्-वुचौ च
5.3.81 जातिनाम्नः कन् कन् 82
5.3.82 अजिनान्तस्योत्तरपदलोपश्च लोपः 84
5.3.83 ठाजादावूर्ध्वं द्वितीयादचः
ठा..र्ध्वम्, अचः 84
5.3.84 शेवल-सुपरि-विशाल-वरुणार्य-मादीनां
तृतीयात्
5.3.85 अल्पे
5.3.86 ह्रस्वे 87
5.3.87 संज्ञायां कन्
5.3.88 कुटी-शमी-शुण्डाभ्यो रः
5.3.89 कुत्वा डुपच्
5.3.90 कासू-गोणीभ्यां ष्टरच् ष्टरच् 91
5.3.91 वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे

5.3.92 किं-यत्तदो निर्धारणे द्वयोरेकस्य डतरच् किंयत्तदः, निर्धारणे, एकस्य 93
5.3.93 वा बहूनां जातिपरिप्रश्ने डतमच्
5.3.94 एकाच्च प्राचाम्
5.3.95 अवक्षेपणे कन् कन् 100

(तद्धितेषु स्वार्थिकाः)

5.3.96 इवे प्रतिकृतौ इवे 111; प्रतिकृतौ 100
5.3.97 संज्ञायां च संज्ञायाम् 100
5.3.98 लुम्मनुष्ये लुप् 100
5.3.99 जीविकार्थे चापण्ये
5.3.100 देवपथादिभ्यश्च
5.3.101 वस्तेर्ढञ्
5.3.102 शिलाया ढः
5.3.103 शाखादिभ्यो यः यः 104
5.3.104 द्रव्यं च भव्ये
5.3.105 कुशाग्राच्छः छः 106
5.3.106 समासाच्च तद्विषयात्
5.3.107 शर्करादिभ्योऽण्
5.3.108 अङ्गुल्यादिभ्यष्ठक् ठक् 109
5.3.109 एकशालायाष्ठजन्यतरस्याम्
5.3.110 कर्क-लोहितादीकक्
5.3.111 प्रत्न-पूर्व-विश्वेमात् थाल् छन्दसि
5.3.112 पूगाञ् ञ्योऽग्रामणीपूर्वात् ञ्यः 113
5.3.113 व्रात-च्फञोरस्त्रियाम्
5.3.114 आयुधजीविसंघाञ् ञ्यड् वाहीकेष्व-ब्राह्मण-राजन्यात् आ..घात् 117
5.3.115 वृकाट् टेण्यण्
5.3.116 दामन्यादि-त्रिगर्तषष्ठाच्छः
5.3.117 पर्श्वादि-यौधेयादिभ्योऽणञौ
5.3.118 अभिजिद्-विदभृच्-छालावच्-छिखावच्-छमीवदूर्णावच्-छ्रुमदणो यञ्
5.3.119 ञ्यादयस्तद्राजाः

॥ इति अष्टाध्यायीसूत्रपाठे पञ्चमाध्यायस्य तृतीयः पादः ॥

अथ पञ्चमोऽध्यायस्य चतुर्थः पादः

5.4.1 पाद-शतस्य सङ्ख्यादेर्वीप्सायां वुन् लोपश्च 2
5.4.2 दण्ड-व्यवसर्गयोश्च
5.4.3 स्थूलादिभ्यः प्रकारवचने कन् कन् 6
5.4.4 अनत्यन्तगतौ क्तात् क्तात् 5
5.4.5 न सामिवचने
5.4.6 बृहत्या आच्छादने
5.4.7 अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात् खः खः 8
5.4.8 विभाषाञ्चेरदिक्-स्त्रियाम्
5.4.9 जात्यन्ताच्छ बन्धुनि छ 10
5.4.10 स्थानान्ताद्विभाषा सस्थानेनेति चेत्
5.4.11 किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे 12
5.4.12 अमु च च्छन्दसि
5.4.13 अनुगादिनष्ठक्

5.4.14 णचः स्त्रियामञ्
5.4.15 अणिनुणः अण् 16
5.4.16 विसारिणो मत्स्ये
5.4.17 सङ्ख्यायाः क्रियाऽभ्यावृत्तिगणने कृत्वसुच् क्रियाऽभ्यावृत्तिगणने 20
5.4.18 द्वि-त्रि-चतुर्भ्यः सुच् सुच् 19
5.4.19 एकस्य सकृच्च
5.4.20 विभाषा बहोर्धाऽविप्रकृष्टकाले
5.4.21 तत्प्रकृतवचने मयट् 22
5.4.22 समूहवच्च बहुषु
5.4.23 अनन्तावसथेतिह-भेषजाञ् ञ्यः
5.4.24 देवतान्तात् तादर्थ्ये यत् तादर्थ्ये 26; यत् 25
5.4.25 पादार्घाभ्यां च
(वा०) भाग-रूप-नामभ्यो धेयः
5.4.26 अतिथेर्ञ्यः
5.4.27 देवात् तल्
5.4.28 अवेः कः
5.4.29 यावादिभ्यः कन् कन् 33
5.4.30 लोहितान् मणौ लोहितान् 32
5.4.31 वर्णे चानित्ये 33
5.4.32 रक्ते 33
5.4.33 कालाच्च
5.4.34 विनयादिभ्यष्ठक् ठक् 35
5.4.35 वाचो व्याहृतार्थायाम् व्या..म् 36
5.4.36 तद्युक्तात् कर्मणोऽण् अण् 38
5.4.37 ओषधेरजातौ
5.4.38 प्रज्ञादिभ्यश्च
5.4.39 मृदस्तिकन् मृदः 40
5.4.40 स-स्नौ प्रशंसायाम् प्रशंसायाम् 41
5.4.41 वृक-ज्येष्ठाभ्यां तिल्-तातिलौ च च्छन्दसि
5.4.42 बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् कारकात् 43; अन्यतरस्याम् 50
5.4.43 सङ्ख्यैकवचनाच्च वीप्सायाम्
5.4.44 प्रतियोगे पञ्चम्यास्तसिः पञ्चम्याः 45; तसिः 49
(वा०) आद्यादिभ्यस्तसोरुपसङ्ख्यानम्
5.4.45 अपादाने चाहीय-रुहोः
5.4.46 अतिग्रहाव्यथन-क्षेपेष्वकर्तरि तृतीयायाः अकर्तरि तृतीयायाः 47
5.4.47 हीयमान-पापयोगाच्च
5.4.48 षष्ठ्या व्याश्रये षष्ठ्याः 49
5.4.49 रोगाच्चापनयने
5.4.50 कृ-भ्वस्तियोगे संपद्यकर्तरि च्विः कृ..गे 57; सं..रि 52; च्विः 51
(वा०) अभूततद्भाव इति वक्तव्यम्
5.4.51 अरुर्-मनश्-चक्षुश्-चेतो-रहो-रजसां लोपश्च
5.4.52 विभाषा साति कार्त्स्न्ये विभाषा 53; साति 55
5.4.53 अभिविधौ सम्पदा च सम्पदा 55
5.4.54 तदधीनवचने 55
5.4.55 देये त्रा च त्रा 56
5.4.56 देव-मनुष्य-पुरुष-पुरु-मर्त्येभ्यो द्वितीया-सप्तम्योर्बहुलम्
5.4.57 अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच् डाच् 67

5.4.58 कृञो द्वितीय-तृतीय-शम्ब-बीजात् कृषौ कृञः 67; कृषौ 59
5.4.59 सङ्ख्यायाश्च गुणान्तायाः
5.4.60 समयाच्च यापनायाम्
5.4.61 सपत्त्र-निष्पत्त्रादतिव्यथने
5.4.62 निष्कुलान्निष्कोषणे
5.4.63 सुख-प्रियादानुलोम्ये
5.4.64 दुःखात् प्रातिलोम्ये
5.4.65 शूलात् पाके
5.4.66 सत्यादशपथे
5.4.67 मद्रात् परिवापणे

(तद्धितेषु समासान्त-प्रकरणम्)

5.4.68 समासान्ताः 160
5.4.69 न पूजनात् न 71
5.4.70 किमः क्षेपे
5.4.71 नञस्तत्पुरुषात् 72
5.4.72 पथो विभाषा
5.4.73 बहुव्रीहौ सङ्ख्येये डजबहु-गणात्

(सर्वसमासान्ताः)

5.4.74 ऋक्-पूरब्-धूः-पथामानक्षे
5.4.75 अच् प्रत्यन्ववपूर्वात् साम-लोम्नः अच् 87
5.4.76 अक्ष्णोऽदर्शनात्
5.4.77 अचतुर-विचतुर-सुचतुर-स्त्रीपुंस-धेन्वनडुह-र्कसाम-वाङ्मनसाक्षिभ्रुव-दारगवोर्वष्ठीव-पदष्ठीव-नक्तन्दिव-रत्रिन्दिवाहर्दिव-सरजस-निःश्रेयस-पुरुषायुष-द्व्यायुष-त्र्यायुषर्ग्यजुष-जातोक्ष-महोक्ष-वृद्धोक्षोपशुन-गोष्ठश्वाः
5.4.78 ब्रह्म-हस्तिभ्याम् वर्चसः
5.4.79 अव-समन्धेभ्यस्तमसः
5.4.80 श्वसो वसीयः-श्रेयसः
5.4.81 अन्वव-तप्ताद् रहसः
5.4.82 प्रतेरुरसः सप्तमीस्थात्
5.4.83 अनुगवमायामे
5.4.84 द्विस्तावा त्रिस्तावा वेदिः
5.4.85 उपसर्गादध्वनः

(तत्पुरुषसमासान्ताः)

5.4.86 तत्पुरुषस्याङ्गुलेः सङ्ख्याव्ययादेः तत्पुरुषस्य 105; सङ्ख्याव्ययादेः 88
5.4.87 अहस्-सर्वैकदेश-सङ्ख्यात-पुण्याच्च रात्रेः
5.4.88 अह्नोऽह्न एतेभ्यः अह्नोऽह्नः 90
5.4.89 न सङ्ख्यादेः समाहारे न 90
5.4.90 उत्तमैकाभ्यां च
5.4.91 राजाहःसखिभ्यष्टच् टच् 112
5.4.92 गोरतद्धितलुकि
5.4.93 अग्राख्यायामुरसः
5.4.94 अनो-ऽश्मायस्-सरसां जाति-संज्ञयोः
5.4.95 ग्राम-कौटाभ्यां च तक्ष्णः
5.4.96 अतेः शुनः शुनः 97
5.4.97 उपमानादप्राणिषु उपमानात् 98
5.4.98 उत्तर-मृग-पूर्वाच्च सक्थ्नः
5.4.99 नावो द्विगोः नावः 100; द्विगोः 101
5.4.100 अर्धाच्च 101
5.4.101 खार्याः प्राचाम्
5.4.102 द्वि-त्रिभ्यामञ्जलेः
5.4.103 अनसन्तान्नपुंसकाच्छन्दसि

5.4.104 ब्रह्मणो जानपदाख्यायाम्
ब्रह्मणः 105

5.4.105 कु-महद्भ्यामन्यतरस्याम्

(द्वन्द्वसमासान्तविधिः)

5.4.106 द्वन्द्वाच् चु-द-ष-हान्तात् समाहारे

(अव्ययीभावसमासान्तविधिः)

5.4.107 अव्ययीभावे शरत्प्रभृतिभ्यः
अव्ययीभावे 112

5.4.108 अनश्च अनः 109

5.4.109 नपुंसकादन्यतरस्याम् अ..म् 112

5.4.110 नदी-पौर्णमास्याग्रहायणीभ्यः

5.4.111 झयः

5.4.112 गिरेश्च सेनकस्य

(बहुव्रीहिसमासान्तविधिः)

5.4.113 बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्
बहुव्रीहौ 160; षच् 114

5.4.114 अङ्गुलेर्दारुणि

5.4.115 द्वि-त्रिभ्यां ष मूर्ध्नः

5.4.116 अप् पूरणी-प्रमाण्योः अप् 117

5.4.117 अन्तर्बहिर्भ्यां च लोम्नः

5.4.118 अञ् नासिकायाः संज्ञायां नसं चास्थूलात्
अच् 121; नासिकायाः, नसम् 119

5.4.119 उपसर्गाच्च

5.4.120 सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरश्रैणीपदाजपद-प्रोष्ठपदाः

5.4.121 नञ्-दुः-सुभ्यो हलि-सक्थ्योरन्यतरस्याम् न..भ्यः 122

5.4.122 नित्यमसिच् प्रजा-मेधयोः
असिच् 123

5.4.123 बहुप्रजाश्छन्दसि

5.4.124 धर्मादनिच् केवलात् अनिच् 126

5.4.125 जम्भा सु-हरित-तृण-सोमेभ्यः

5.4.126 दक्षिणेर्मा लुब्धयोगे

5.4.127 इच् कर्मव्यतिहारे इच् 128

5.4.128 द्विदण्ड्यादिभ्यश्च

5.4.129 प्र-सम्भ्यां जानुनोर्ज्ञुः जा..र्ज्ञुः 130

5.4.130 ऊर्ध्वाद् विभाषा

5.4.131 ऊधसोऽनङ् अनङ् 133

5.4.132 धनुषश्च धनुषः 133

5.4.133 वा संज्ञायाम्

5.4.134 जायाया निङ्

5.4.135 गन्धस्येदुत्-पूति-सु-सुरभिभ्यः
गन्धस्य, इत् 137

5.4.136 अल्पाख्यायाम्

5.4.137 उपमानाच्च उपमानात् 138

5.4.138 पादस्य लोपोऽहस्त्यादिभ्यः
पादस्य लोपः 140

5.4.139 कुम्भपदीषु च

5.4.140 सङ्ख्या-सुपूर्वस्य

5.4.141 वयसि दन्तस्य दतृ दन्तस्य दतृ 145

5.4.142 छन्दसि च

5.4.143 स्त्रियां संज्ञायाम्

5.4.144 विभाषा श्यावारोकाभ्याम् विभाषा 145

5.4.145 अग्रान्त-शुद्ध-शुभ्र-वृष-वराहेभ्यश्च

5.4.146 ककुदस्यावस्थायां लोपः लोपः 149

5.4.147 त्रिककुत् पर्वते

5.4.148 उद्-विभ्यां काकुदस्य काकुदस्य 149

5.4.149 पूर्णाद् विभाषा

5.4.150 सुहृद्-दुर्हृदौ मित्रामित्रयोः
5.4.151 उरःप्रभृतिभ्यः कप् कप् 160
5.4.152 इनः स्त्रियाम्
5.4.153 नद्यृतश्च
5.4.154 शेषाद्विभाषा
5.4.155 न संज्ञायाम् न 160
5.4.156 ईयसश्च
5.4.157 वन्दिते भ्रातुः
5.4.158 ऋतश्छन्दसि
5.4.159 नाडी-तन्त्र्योः स्वाङ्गे
5.4.160 निष्प्रवाणिश्च

॥ इति अष्टाध्यायीसूत्रपाठे पञ्चमाध्यायस्य चतुर्थः पादः ॥

॥ इति अष्टाध्यायीसूत्रपाठे पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः

अथ प्रथमः पादः

(द्वित्व-प्रकरणम्)

6.1.1 एकाचो द्वे प्रथमस्य 11
6.1.2 अजादेर्द्वितीयस्य 11
6.1.3 न न्-द्-राःसंयोगादयः
(वा०) यथेष्टं नामधातुष्विति वक्तव्यम्
6.1.4 पूर्वोऽभ्यासः
6.1.5 उभे अभ्यस्तम् अभ्यस्तम् 6
6.1.6 जक्षित्यादयः षट्
6.1.7 तुजादीनां दीर्घोऽभ्यासस्य
6.1.8 लिटि धातोरनभ्यासस्य ध..स्य 11
6.1.9 सन्-यङोः
6.1.10 श्लौ
6.1.11 चङि
6.1.12 दाश्वान् साह्वान् मीढ्वांश्च

(संप्रसारण-प्रकरणम्)

6.1.13 ष्यङः संप्रसारणं पुत्र-पत्योस्तत्पुरुषे ष्यङः 14; संप्रसारणम् 31
6.1.14 बन्धुनि बहुव्रीहौ
6.1.15 वचि-स्वपि-यजादिनां किति किति 16
6.1.16 ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च
6.1.17 लिट्यभ्यासस्योभयेषाम्
6.1.18 स्वापेश्चङि
6.1.19 स्वपि-स्यमि-व्येञां यङि यङि 21
6.1.20 न वशः
6.1.21 चायः की
6.1.22 स्फायः स्फी निष्ठायाम् निष्ठायाम् 28
6.1.23 स्त्यः प्रपूर्वस्य

6.1.24 द्रवमूर्ति-स्पर्शयोः श्यः श्यः 26
6.1.25 प्रतेश्च
6.1.26 विभाषाऽभ्यव-पूर्वस्य विभाषा 28
6.1.27 शृतं पाके
6.1.28 प्यायः पी 29
6.1.29 लिङ्-यङोश्च लिङ्यङोः 30
6.1.30 विभाषा श्वेः 31
6.1.31 णौ च संश्चङोः 32
6.1.32 ह्वः संप्रसारणम् ह्वः 34; संप्रसारणम् 36
6.1.33 अभ्यस्तस्य च
6.1.34 बहुलं छन्दसि बहुलम् 35; छन्दसि 36
6.1.35 चायः की
6.1.36 अपस्पृधेथामानृचुरानृहुश्चिच्युषे तित्याज श्राताः श्रितमाशीराशीर्त्ताः
6.1.37 न संप्रसारणे संप्रसारणम् न संप्रसारणम् 44
6.1.38 लिटि वयो यः लिटि 40; वयो यः 39
6.1.39 वश्चास्यान्यतरस्यां किति
6.1.40 वेञः 41
6.1.41 ल्यपि च ल्यपि 44
6.1.42 ज्यश्च
6.1.43 व्यश्च व्यः 44
6.1.44 विभाषा परेः

(आत्वादि-प्रकरणम्)

6.1.45 आदेच उपदेशेऽशिति आद्, एचः 57; उपदेशे 64
6.1.46 न व्यो लिटि
6.1.47 स्फुरति-स्फुलत्योर्घञि
6.1.48 क्रीङ्-जीनां णौ णौ 49
6.1.49 सिध्यतेरपारलौकिके
6.1.50 मीनाति-मिनोति-दीङां ल्यपि च ल्यपि 51
(वा०) स्थाध्वोरित्त्वे दीङः प्रतिषेधः
6.1.51 विभाषा लीयतेः विभाषा 56
6.1.52 खिदेश्छन्दसि
6.1.53 अपगुरो णमुलि
6.1.54 चि-स्फुरोर्णौ णौ 57
6.1.55 प्रजने वीयतेः
6.1.56 बिभेतेर्हेतुभये हेतुभये 57
6.1.57 नित्यं स्मयतेः
6.1.58 सृजि-दृशोर्झल्यमकिति झ..ति 59
6.1.59 अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्
6.1.60 शीर्षश्छन्दसि शीर्षन् 61
6.1.61 ये च तद्धिते
6.1.62 अचि शीर्षः
6.1.63 पद् दन् नो मास् हृन् निशसन् यूषन् दोषन् यकञ् छकन्नुदन्नासञ् छस्प्रभृतिषु
6.1.64 धात्वादेः षः सः धात्वादेः 65
6.1.65 णो नः

(लोप-प्रकरणम्)

6.1.66 लोपो व्योर्वलि लोपः 70
6.1.67 वेरपृक्तस्य
6.1.68 हल्-ङ्याब्भ्यो दीर्घात् सु-तिस्यपृक्तं हल् हल् 69
6.1.69 एङ्-ह्रस्वात् सम्बुद्धेः
6.1.70 शेश्छन्दसि बहुलम्

(तुगादि-प्रकरणम्)

6.1.71 ह्रस्वस्य पिति कृति तुक् ह्रस्वस्य 73; तुक् 76

(सन्धि-प्रकरणम्)

6.1.72 संहितायाम् 158

6.1.73 छे च छे 76

6.1.74 आङ्-माङोश्च

6.1.75 दीर्घात् 76

6.1.76 पदान्ताद्वा

6.1.77 इको यणचि अचि 125

6.1.78 एचोऽयवायावः एचः 83

6.1.79 वान्तो यि प्रत्यये
वान्तः 80; यि प्रत्यये 83

(वा०) गोर्यूतौ च्छन्दस्युपसङ्ख्यानम्

(वा०) अध्वपरिमाणे च

6.1.80 धातोस्तन्निमित्तस्यैव धातोः 83

6.1.81 क्षय्य-जय्यौ शक्यार्थे

6.1.82 क्रय्यस्तदर्थे

6.1.83 भय्य-प्रवय्ये च च्छन्दसि

(एकादेशादि-प्रकरणम्)

6.1.84 एकः पूर्वपरयोः 111

6.1.85 अन्तादिवच्च

6.1.86 षत्व-तुकोरसिद्धः

6.1.87 आद् गुणः आत् 96

6.1.88 वृद्धिरेचि वृद्धिः 92; एचि 89

6.1.89 एत्येधत्यूठ्सु

(वा०) अक्षादूहिन्यामुपसङ्ख्यानम्

(वा०) प्रादूहोढोढ्येषैष्येषु

(वा०) ऋते च तृतीया-समासे

(वा०) प्रवत्सतर-कम्बल-वसनार्ण-दशानामृणे

6.1.90 आटश्च

6.1.91 उपसर्गाद् ऋति धातौ
उपसर्गाद्, धातौ 94; ऋति 92

6.1.92 वा सुप्यापिशलेः

6.1.93 औतोऽम्-शसोः

6.1.94 एङि पररूपम् पररूपम् 100

(वा०) शकन्ध्वादिषु पररूपं वाच्यम्

6.1.95 ओमाङोश्च

6.1.96 उस्यपदान्तात् अपदान्तात् 97

6.1.97 अतो गुणे

6.1.98 अव्यक्तानुकरणस्यात इतौ
अव्य..स्य, अतः 100; इतौ 99

6.1.99 नाम्रेडितस्यान्त्यस्य तु वा

6.1.100 नित्यमाम्रेडिते डाचि

6.1.101 अकः सवर्णे दीर्घः
अकः 107; दीर्घः 106

(वा०) ऋति सवर्णे ऋ वा

(वा०) लृति सवर्णे लृ वा

6.1.102 प्रथमयोः पूर्वसवर्णः पूर्वसवर्णः 106

6.1.103 तस्माच्छसो नः पुंसि

6.1.104 नादिचि न 105; इचि 106

6.1.105 दीर्घाज्जसि च 106

6.1.106 वा च्छन्दसि 108

6.1.107 अमि पूर्वः पूर्वः 110

6.1.108 संप्रसारणाच्च

6.1.109 एङः पदान्तादति एङः 110; अति 113

6.1.110 ङसिङसोश्च ङसिङसोः 112

6.1.111 ऋत उत् उत् 112

6.1.112 ख्यत्यात् परस्य

6.1.113 अतो रोरप्लुतादप्लुते अतो..तात् 114

6.1.114 हशि च

(प्रकृतिभावादि-प्रकरणम्)

6.1.115 प्रकृत्याऽन्तःपादमव्यपरे
प्रकृत्या 130; अन्तःपादम् 116

6.1.116 अव्यादवद्यादवक्रमुरव्रतायमवन्त्व-वस्युषु च

6.1.117 यजुष्युरः यजुषि 121

6.1.118 आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बे-ऽम्बाले-ऽम्बिकेपूर्वे

6.1.119 अङ्ग इत्यादौ च

6.1.120 अनुदात्ते च कु-धपरे अनुदात्ते 121

6.1.121 अवपथासि च

6.1.122 सर्वत्र विभाषा गोः
विभाषा 123; गोः 124

6.1.123 अवङ् स्फोटायनस्य अवङ् 124

6.1.124 इन्द्रे च

6.1.125 प्लुत-प्रगृह्या अचि नित्यम् अचि 130

6.1.126 आङोऽनुनासिकश्छन्दसि

6.1.127 इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च
शाकल्यस्य ह्रस्वः च 128

(वा०) न समासे

6.1.128 ऋत्यकः

6.1.129 अप्लुतवदुपस्थिते अप्लुतवत् 130

6.1.130 ई३ चाक्रवर्मणस्य

6.1.131 दिव उत्

6.1.132 एतत्-तदोः सुलोपोऽकोरनञ्समासे हलि सुलोपः 134; हलि 133

6.1.133 स्यश्छन्दसि बहुलम्

6.1.134 सोऽचि लोपे चेत् पादपूरणम्

(सुट्-प्रकरणम्)

6.1.135 सुट् कात् पूर्वः 157

6.1.136 अडभ्यासव्यवायेऽपि

6.1.137 सम्पर्युपेभ्यः करोतौ भूषणे
सम्पर्युपेभ्यः 138; करोतौ 139

6.1.138 समवाये च

6.1.139 उपात् प्रतियत्न-वैकृत-वाक्याध्याहारेषु
उपात् 141

6.1.140 किरतौ लवने किरतौ 142

6.1.141 हिंसायां प्रतेश्च

6.1.142 अपाच्चतुष्पाच्छकुनिष्वालेखने

6.1.143 कुस्तुम्बुरूणि जातिः

6.1.144 अपरस्पराः क्रियासातत्ये

6.1.145 गोष्पदं सेवितासेवित-प्रमाणेषु

6.1.146 आस्पदं प्रतिष्ठायाम्

6.1.147 आश्चर्यमनित्ये

6.1.148 वर्चस्केऽवस्करः

6.1.149 अपस्करो रथाङ्गम्

6.1.150 विष्किरः शकुनौ वा

6.1.151 ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे

6.1.152 प्रतिष्कशश्च कशेः

6.1.153 प्रस्कण्व-हरिश्चन्द्रावृषी

6.1.154 मस्कर-मस्करिणौ वेणु-परिव्राजकयोः

6.1.155 कास्तीराजस्तुन्दे नगरे

6.1.156 कारस्करो वृक्षः

6.1.157 पारस्करप्रभृतीनि च संज्ञायाम्

(स्वरप्रक्रिया)

6.1.158 अनुदात्तं पदमेकवर्जम्

(उदात्त-प्रकरणम्)

6.1.159 कर्षात्वतो घञोऽन्त उदात्तः
अन्तः 185; उदात्तः 220

6.1.160 उञ्छादीनां च

6.1.161 अनुदात्तस्य च यत्रोदात्तलोपः
6.1.162 धातोः
6.1.163 चितः 164
6.1.164 तद्धितस्य 165
6.1.165 कितः
6.1.166 तिसृभ्यो जसः
6.1.167 चतुरः शसि
6.1.168 सावेकाचस्तृतीयादिर्विभक्तिः
एका..दिः 169; विभक्तिः 184
6.1.169 अन्तोदत्तादुत्तरपदादन्यतरस्याम-नित्यसमासे अन्तोदात्तात् 177
6.1.170 अञ्चेश्छन्दस्यसर्वनामस्थानम्
असर्वनामस्थानम् 175
6.1.171 ऊडिदम्-पदाद्यप्-पुं-रै-द्युभ्यः
6.1.172 अष्टनो दीर्घात्
6.1.173 शतुरनुमो नद्यजादी नद्यजादी 175
6.1.174 उदात्तयणो हल्पूर्वात् 175
6.1.175 नोङ्-धात्वोः
6.1.176 ह्रस्व-नुड्भ्यां मतुप् ह्रस्वः, मतुप् 177
6.1.177 नामन्यतरस्याम् 187
6.1.178 ङ्याश्छन्दसि बहुलम्
6.1.179 षट्-त्रि-चतुर्भ्यो हलादिः
षट्त्रिचतुर्भ्यः 181
6.1.180 झल्युपोत्तमम् 181
6.1.181 विभाषा भाषायाम्
6.1.182 न गो-श्वन्-सावर्वर्ण-राडङ्-क्रुङ्-कृद्भ्यः न 184
6.1.183 दिवो झल् झल् 184
6.1.184 नृ चान्यतरस्याम्
6.1.185 तित् स्वरितम्
6.1.186 तास्यनुदात्तेन्ङिद्दुपदेशाल्लसार्व-धातुकमनुदात्तमहन्विङोः
लसार्वधातुकम् 192
6.1.187 आदिः सिचोऽन्यतरस्याम्
आदिः, अन्यतरस्याम् 188
6.1.188 स्वपादिर्हिंसामच्यनिटि
अचि, अनिटि 189
6.1.189 अभ्यस्तानामादिः
अभ्यस्तानाम् 192; आदिः 191
6.1.190 अनुदात्ते च
6.1.191 सर्वस्य सुपि
6.1.192 भी-ह्री-भृ-हु-मद-जन-धन-दरिद्रा-जागरां प्रत्ययात् पूर्वं पिति
प्रत्ययात् पूर्वम् 193
6.1.193 लिति
6.1.194 आदिर्णमुल्यन्यतरस्याम्
आदिः, अन्यतरस्याम् 196
6.1.195 अचः कर्तृयकि
6.1.196 थलि च सेटीडन्तो वा
6.1.197 ञ्नित्यादिर्नित्यम् आदिः 216
6.1.198 आमन्त्रितस्य च
6.1.199 पथि-मथोः सर्वनामस्थाने
6.1.200 अन्तश्च तवै युगपत्
6.1.201 क्षयो निवासे
6.1.202 जयः करणम्
6.1.203 वृषादीनां च
6.1.204 संज्ञायामुपमानम् संज्ञायाम् 205
6.1.205 निष्ठा च द्व्यजनात्
6.1.206 शुष्क-धृष्टौ
6.1.207 आशितः कर्ता

6.1.208 रिक्ते विभाषा विभाषा 209
6.1.209 जुष्टार्पिते च च्छन्दसि जुष्टार्पिते 210
6.1.210 नित्यं मन्त्रे
6.1.211 युष्मदस्मदोर्ङसि युष्मदस्मदोः 212
6.1.212 ङयि च
6.1.213 यतोऽनावः
6.1.214 ईड-वन्द-वृ-शंस-दुहां ण्यतः
6.1.215 विभाषा वेण्विन्धानयोः विभाषा 216
6.1.216 त्याग-राग-हास-कुह-श्वठ-क्रथानाम्
6.1.217 उपोत्तमं रिति उपोत्तमम् 218
6.1.218 चङ्यन्यतरस्याम्
6.1.219 मतोः पूर्वमात् संज्ञायां स्त्रियाम् संज्ञायाम् 221
6.1.220 अन्तोऽवत्याः अन्तः 223
6.1.221 ईवत्याः
6.1.222 चौ
6.1.223 समासस्य

॥ इति अष्टाध्यायीसूत्रपाठे षष्ठाध्यायस्य प्रथमः पादः ॥

अथ षष्ठाध्यायस्य द्वितीयः पादः

(समासस्वरे पूर्वपदप्रकृतिभावः)

